Digitized by Sarayu Foundation Trust, Delhi and eGangotri

श्रीकाशीजीमेमहल्ला घुघुरानामामाकीगलीश्रीयुतबाबूहरखचंदजीकेबाडेमेदुर्गाप्र
सादकतरेकेगणेशयंत्रालयमेदशाकर्मपद्धतिछापीगई लिखासीताराममिश्रछापनेवाला
गोपालजिसैलेनाहोयउसेचान्दनीचोकमेकुंजगलीकेपश्चिमफाटककेपासदुर्गाप्रसाद
केदुकानमेमिलेगी ॥

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

ॐ श्रीगणेशायनमः अथगर्भाधानम् तत्रऋतुस्नाताचतुर्थदिनेवधूः प्रातस्तूष्णीमादित्यमुपतिष्ठेत् ततस्त
द्दिनेमातृपूजाभ्युदयिकेकृत्वाषोडशरात्रादर्वाक् शुभरात्रौदक्षिणकरेणपतिर्वध्वाउपस्थमभिमृशञ्जपति ॐ
पूषाभग ठं॰ सवितादधातुरुद्रस्त्वष्टारूपाणितेजोवैश्वानरोदधातु इतिमंत्रेणअथप्राङ्मुखउप॰ उदङ्मु
खोवाएनामभिमंत्रयेदनेनमंत्रेणाॐगर्भंधेहिसिनीवालीगर्भंधेहिपृथुष्टुके गर्भंते अश्विनौदेवावाधत्तांपुष्करस्रजौ
इतिमंत्रेण ततः ॐरेतोमूत्रंविजहातियोनिंप्रविशदिंद्रियं गर्भोजरायुणावृत्तउल्वंजहातिजन्मना इतिमंत्रेणरे
तः स्रावणं अथतस्याहृदयमालभेत ॐयत्तेसुसीमेहृदयंदिविचंद्रमसिश्रितंवेदाहंतन्मांतद्विद्यात् पश्येमशरदः
शतंजीवेमशरदः शत ठं॰ शृणुयामशरदः शतमितिमंत्रेण ततस्तस्योहृष्टमनाः हृष्टेप्रसन्नामनातुरांकाम
यमानाममग्रशय्यायांप्रदोषादूर्द्धंस्त्रियमभिगच्छेत्सायदिगर्भंनदधातितदापतिः कृतोपवासः पुष्यनक्षत्रेश्वेतकंटकारि
कामूलमुत्पाट्योदकेनपिष्ट्वावधूदक्षिणनासापुटेनतद्रसंदद्यात् अनेनैवमंत्रेण ॐइयमोषधीत्रायमाणासह
मानासरस्वती अस्याअहंबृहत्याः पुत्रः पितुरिवनामजाग्रभीमिति इतिगर्भाधानम् १ अथपुंसवनम् तत्र
गर्भमासापेक्षयाद्वितीयतृतीययोरन्यतरस्मिन्करणीयंपुष्यपुनर्वसुमृगशिरोहस्तमूलश्रवणान्यतमपुन्ना।

मनक्षत्रयुतोभयंचंद्रतारानुकूलदिवसमवगत्य ततः पूर्वदिनेवधूमुपवासंकारयित्वाअस्मिन्दिनेतस्याः स्नाता
याअहतवासोयुगपरिधानानंतरंशुचिः स्नातः कृताचमनोमातृपूजाभ्युदयिकादिकंकृत्वा वटप्ररोहंवटशृंगांश्चआ
चारात् कुशकंटकमपिशिशिरेणजलेनपिष्ट्वावधूदक्षिणनासापुटेततरसंदद्यात् ॐ हिरण्यगर्भः समवर्ततासग्रेभूत
स्यजातः पतिरेकआसीत् सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषाविधेम ॐ अद्भ्यः संभृतः पृथिव्यैरसाच्चविश्वक
र्म्मणः समवर्त्तताग्रेतस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रेइतिमंत्राभ्यां इतिपुंसवनम् २ अथसीमं
तोन्नयनम् तत्रगर्भमासापेक्षयाषष्ठेष्टमेवापुन्नामनक्षत्रयुतेचंद्रतारानुकूलेविहितदिनेमातृपूजाभ्युदयिकादिकृ
त्वा बहिः शालायांकुशकण्डिकांकुर्यात् तत्रक्रमः कुशत्रयेणहस्तपरिमितचतुरस्रभूमिंपरिसमुह्यकुशानैशान्यांनिः
क्षिप्य गोमयोदकेनोपलिप्यस्रुवमूलेनस्फ्येनवोत्तरतस्त्रिरुल्लिख्योल्लेखनक्रमेणानामिकांगुष्ठाभ्यांमृदमुद्धृत्यवारि
णातंदेशमभिषिंच्यकांस्यपात्रेणाग्निमादायतत्रप्रत्यङ्मुखंनिदध्यात् ततोब्राह्मणवरणम् ॐ अद्यकर्तव्यसीमंतोन्न-
यनहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणंब्राह्मणमेभिः पुष्पचंदनतांबूलवासो-
भिर्ब्रह्मत्वेनत्वामहंवृणे ॐ वृतोस्मीतिप्रतिवचनं ॐ यथाविहितंकर्मकुर्वितिहोत्राभिहिते ॐ करवाणीतिप्रतिवचना

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

ततरं अग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान्कुशानास्तीर्यास्मिन्सीमंतोन्नयनहोमकर्मणि त्वं मे ब्रह्मा
भवेत्यभिधाय ओं भवामीति तेनोक्ते अग्निं प्रदक्षिणं कारयित्वा ब्रह्माणं तत्रोपवेश्य प्रणीतापात्रं पुरतः कृत्वा जलेनापू
र्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्ने
यादीशानांतं ब्रह्मणोग्निपर्यंतं नैर्ऋत्याद्वायव्यांतं अग्नितः प्रणीतापर्यंतं ततोग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं
कुशत्रयं पवित्रकरणार्थं साग्रमनंतर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थाली चरुस्थाली सम्मार्जनकुशाः उप
यमनकुशाः प्रादेशमिताः पालाशसमिधस्तिस्रः स्रुवः आज्यं षट्पंचाशदुत्तरयजमानमुष्टिशतद्वयावच्छिन्नं तंडुल
पूर्णपात्रं तिलमुद्गमिश्रास्तंडुलाः पूर्णपात्रं एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि तदु
त्तरतः वीणागाथिनौ प्रादेशमात्रमाग्राश्वत्थशंकुः त्रिश्वेतशल्लकीकंटकं पीतसूत्रपूर्णस्तर्कुः दर्भपिंजुलिकात्रयं राम २
उदुंबरयुग्मफलसुवर्णघटितदेवकर्करादियुक्तसूत्रडोरकपुष्पविल्वादिफलयुतवाराष्टनयादि अन्यद्यथाचारप
रिप्राप्तद्रव्यमासादनीयं ततः पवित्रच्छेदनार्थकुशैः प्रादेशमितपवित्रे छित्वा सपवित्रपाणिना प्रणीतोदकं त्रिः प्रो
क्षणीपात्रे कृत्वा अनामिकांगुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं प्रणीतोदकेन प्रोक्षणीप्रोक्षणं ततः प्रोक्षणी।

जलेन यथासादितद्रव्यसेचनं ततोऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निधानं ततः आज्यस्थाल्यामाज्यनिर्वापः चरौ तु
तिलतण्डुलमुद्गानां प्रणीतोदकेन त्रिः प्रक्षाल्य तत्र किंचिज्जलं दत्वा प्रक्षेपः ततः स्वयं चरुं गृहीत्वा ब्रह्मणा
चाज्यं ग्राहयित्वा वह्नेरुत्तरतश्चरुं दक्षिणतः आज्यं युगपत् निदध्यात् ततः सिद्धे चरौ ज्वलत्तृणं प्रदक्षिणं।
भ्रामयित्वा वह्नौ तत्प्रक्षेपः ततः स्रुवप्रतपनं त्रिः ततः सम्मार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यतः स्रुवं सम्मृ
ज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य दक्षिणतो निदध्यात् ततः आज्यमग्नितश्चरोः पूर्वेणानीयाग्रे धृत्वा आ
ज्यपश्चिमेन चरुमानीयाज्यस्योत्तरतो निदध्यात् ततः आज्ये प्रोक्षणीवदुत्पवनं अवेक्ष्य सत्यपद्रव्ये तन्निरस
नं ततः पूर्ववत्प्रोक्षण्युत्पवनं तत उत्थायोपयमनकुशानादाय प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ क्षिपेत्
समिधः घृताक्ताः अथोपविश्य सपवित्रप्रोक्षणीजलेनाग्निं प्रदक्षिणक्रमेण पर्युक्ष्य प्रणीतापात्रे पवित्रे
धृत्वा ब्रह्मणान्वारब्धः पातितदक्षिणजानुर्जुहुयात् तत आहुतिचतुष्टये प्रत्याहुत्यनंतरं हुतशेषस्य घृतस्य प्रो
क्षणीपात्रे प्रक्षेपः ततः समिद्धतमेऽग्नौ ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ॐ इंद्राय स्वाहा इदमिं।
द्राय इत्याघारौ ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय इत्याज्यभागौ ततोऽन्वारब्धस्थालीपा

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

द०क० ३ केनहोमः ॐप्रजापतयेस्वाहा इदंप्रजापतये इतिमनसाततोनन्वारब्धोजुहुयात् ततदाहुत्यनंतरंस्रुवावस्थि
तहुतशेषस्यप्रोक्षण्यांप्रक्षेपः ततैवाज्यस्थालीपाकाभ्यांस्विष्टकृद्धोमः ॐअग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्ट
कृते ॐभूःस्वाहा इदंभूः ॐभुवःस्वाहा इदंभुवः ॐस्वःस्वाहा इदंस्वः एतामहाव्याहृतयः ॐत्वन्नोअग्नेवरुणस्य
विद्वान्देवस्यहेडोअवयासिसीष्ठाःयजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषꣳसिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्नी
वरुणाभ्यां ॐसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ अवयक्ष्वनोवरुणꣳ रराणोवीहिमृडीकꣳ
सुहवोनएधिस्वाहा इदमग्नीवरुणाभ्यां ॐअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्वमयाअसि अयानोयज्ञंवहास्य
यानोधेहिभेषजꣳ स्वाहा इदमग्नये ॐयेतेशतंवरुणयेसहस्रंयज्ञियाःपाशावितताम्महान्तः तेभिर्नोअद्यसवितो
तविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काः स्वाहा इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः ॐउदुत्त
मंवरुणपाशमस्मदवाधमंविमध्यमꣳ श्रथाय अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा इदं
वरुणाय इतिसर्वप्रायश्चित्तं ॐप्रजापतयेस्वाहा इदंप्रजापतये इतिप्राजापत्यं अथसंस्रवप्राशनंततआच राम ३
म्य ॐअद्यसीमंतोन्नयनहोमकर्म्मणिकृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदै

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

वतममुकगोत्रायामुकशर्मणेब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे ओं स्वस्तीति प्रतिवचनं ततो ब्रह्मग्रंथिविमोकः ततः ओं सुमित्रियान आप ओषधयः संतु इति पवित्राभ्यां प्रणीताजलेन शिरः संमृज्य ओं दुर्मित्राया स्तस्मै संतु योऽस्मान् द्वेष्टि यं च वयं द्विष्मः इत्यैशान्यां प्रणीतान्युब्जीकरणं ततस्तरणाक्रमेण बर्हिर्हुत्वाप्याज्येनाभिघार्य ओं देवा गातुविदो गातुं वित्वा गातुमित मनसस्पत इमं देवयज्ञꣳ स्वाहा वाते धाः स्वाहा इति मंत्रेण बर्हिर्होमः ततः पश्चादग्नेर्वधूमहतवाससी परिधाय मृद्वासने उपवेशयेत् ततस्त्रिश्वेतशल्लकीकंटकाश्वत्थशंकुपीततंतुतर्कुदर्भपिंजूलीत्रितयउदुंबरफलयुग्मान्वितप्रादेशमितशाखाभिर्वर्तुलीकृत्य सीमंतम् ईनि विनयति ओं भूर्भुवः स्वः विनयामीति इति मंत्रेण सकृत् ओं भूर्विनयामि ओं भुवः विनयामि ओं स्वर्विनयामि इति मंत्रेण वारत्रयं तत उदुंबरफलयुग्मान्वितशल्लकीकंटकादिपंचकं वधूसीमंतदक्षिणतो वेणीं कृत्वा पतिर्बध्नाति ओं अयमूर्ज्जावतो वृक्ष ऊर्ज्जीव फलिनी भव इति मंत्रेण तत उदुंबरफलादिसमन्वितसूत्रडोरकं वधूग्रीवायां अनेनैव क्रमेण वा आचाराद् बध्नीयात् ततो विल्वादिसमन्वितवाराघृतपेन स्नपनं ततः फलपुष्पादिकं नूतनवस्त्रेण बध्वा प्रतीक्ष्य धर्तव्यं प्रति स्नपने स्वामिपठनीयो मंत्रः ओं अयमूर्ज्जेति राजानं संगायेतामिति प्रैषानंतरं सोम एव नो राजेमा मानुषीः प्रजाः अविमुक्तचक्र।

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

द॰क॰ ऋंददग्निःस्तनयन्निव द्यौः क्षामारेरिहद्वीरुधःसमंजन् सद्योयज्ञानो विहीमिद्धो अख्यदारोदसीभानुनाभात्यन्तः
५ ४ श्रीणामुदारोधरुणोरयीणांमनीषाणांप्रार्पणःसोमगोपाः वसुः सूनुः सहसो अप्सुराजाविभात्यग्र उषसामिधानः ५
ॐविश्वस्यकेतुर्भुवनस्यगर्भआरोदसीअपृणाज्जायमानः वीडुंचिदद्रिमभिनत्परायंजनायदग्निमयजंतपं
च ६ ॐउशिक्पावकोअरतिःसुमेधामर्त्येष्वग्निरमृतोनिधायि इयर्तिधूममरुषंभरिभ्रदुच्छुक्रेणशोचिषाद्या
मिनक्षन् ७ ॐदृशानोरुक्मउर्व्याव्यद्यौद्दुर्मर्षमायुःश्रियेरुचानः अग्निरमृतोअभवद्वयोभिर्यदेनंद्यौरजनयत्सुरेताः
८ ॐयस्तेअद्यकृणवद्भद्रशोचेयूपंदेवघृतवंतमग्ने प्रतन्नयप्रतरंवस्योअच्छाभिसुम्नंदेवभक्तंयविष्ठ ९ ॐआतं
भजसौश्रवसेष्वग्नउक्थउक्थआभजशस्यमाने प्रियःसूर्येप्रियोअग्नाभवात्युज्जातेनभिनदद्युज्जनित्वैः १० ॐत्वामग्नेय
जमानाअनुद्यून्विश्वावसुदधिरेवार्याणि त्वयासहद्रविणमिच्छमानाव्रजंगोमन्तमुशिजोविवव्रुः ततःकुमारंप्रा
ति दिशमेकैकंब्राह्मणंमध्येपंचसूर्द्धमवेक्ष्यमाणमवस्थाप्यतमुद्दिश्यइममनुप्राणितेतिपिताब्रूयात् ततस्तेषुप्राणे राम ५
तिपूर्वोव्यानेतिदक्षिणोअपानेति अपरउदानेतिउत्तरतउपरिष्टादवेक्ष्यमाणः समानेतिपंचमोब्रूयात् एषामसंभवे
स्वयमेवतत्रतत्रोपविश्यतथैवब्रूयात् अथकुमारस्यजन्मभूमिमभिमंत्रयेत ॐवेदतेभूमिहृदयंदिविचंद्रमसिश्रि
एषामसंभवेस्वपमेव१

तं वेदाहं तन्मां तद्विद्यान्पश्येम शरदः शतं जीवेम शरदः शतं ँ शृणुयाम शरदः शतमित्यनेन अथ कुमारमभिमृश
ति अस्माभव परशुर्भव हिरण्यमश्रुतंभव आत्मा वै पुत्रनामासि त्वं जीव शरदः शतमित्यनेन ततः कुमारमा-
तरमभिमंत्रयेत् इडासि मैत्रावरुणी वीरे वीरमजीजनथाः सात्वं वीरवती भव यास्मान्वीरवतोकरत् इत्यनेन त
तः कुमारनाभिवर्द्धने कृते तस्या दक्षिणस्तनं प्रक्षाल्य कुमारस्य प्रयच्छति ॐ इम ँ स्तनमूर्ज्जस्वंतं धयायां प्रती
तमग्ने शरीरस्य मध्ये उत्सं जुषस्व मधुमंतमर्वन्नसमुद्रिय ँ सदनमाविशस्व इति मंत्रेण ततो वामस्तनं प्रक्षा-
ल्य प्रयच्छति ॐ इम ँ स्तनमित्यादि यस्ते स्तनः शशयो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः येन विश्वा पुष्यसि वी
र्याणि सरस्वति तमिह धातवेकः इति मंत्राभ्यां ततः प्रसवित्रीशयनीयः मस्तकोपरि भूमौ वारिपूर्णभाजनं निद
ध्यात् अपो देवेषु जाग्रथ यथा देवेषु जाग्रथ एवमस्यां सूतिकायां सपुत्रिकायां जाग्रथेत्यनेन मंत्रेण ततश्च सूतिकोत्था
पनपर्यंतं तत्रैव धर्त्तव्यं ततः सूतिकागृहद्वारप्रदेशे पञ्चभूसंस्कारान् कृत्वाग्नेरूपसमाधानं स चाग्निरुत्थानदिन
पर्यंतं तत्रैव धर्त्तव्यः तत्र चाग्नौ संध्ययोः फलीकरणास्तंडुलांस्तन्मिश्रान् सर्षपान् दशदिनानि पिता अन्यो वा ब्राह्म
णो नित्यं हस्तेन जुहोति तत्र प्रथमाहुतौ मंत्रः ॐ शण्डामर्काभ्यां उपवीरः शौण्डिकेय उलूखलः मलिम्लुचो द्रोणाश्च्य

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

वनोनश्यनादितः स्वाहा इदंशण्डामर्काभ्यामुपवीरायमलिम्लुचायद्रोणेभ्यश्च्यवनायद्वितीयाहुतौ ओंआलिख
न्ननिमिषः किंवदंतउपश्रुतिर्हर्यक्षः कुंभीशत्रुः पात्रपाणिर्नृमणिर्हंत्रीमुखः सर्षपारुणश्च्यवनोनश्यनादितः
स्वाहा इदमालिखनेनिमिषायकिंवदुंत्र उपश्रुतयेहर्यक्षायकुंभीशत्रवेपात्र पाणयेनृमणयेहंतृमुखायस
र्षपायारुणाय अथयदिदशाहाभ्यंतरेकुमारग्रहोवालमाविशेत्तेना विश्लोननामयतिनरोदितिनहृष्यतिनगु
ष्यतिचतदैतन्नैमित्तिकंकर्त्तव्यं नदातंवालकंजालेनाच्छाद्य उत्तरीयेणवाससाअंकमादायतंवालंपिताजा
पति कूर्कुरसुकूर्करः कूर्कुरोवालवंधनः चेच्चेच्छुनकसृजनमस्तेअस्तुसीसरोलपेनापव्हरतस्नंयत्तेदेवावर
मददुःसत्वकुमारमेववृणीथाः चेच्चेच्छुनकनमस्तेअस्तुसीसरोलपेतापव्हरतस्न्यपतसरमामातासीनरःपिताश्यामशवलौ
भ्रातरौचेच्चेशुनकसृजनमस्तेस्तसीसरोलपेतापव्हरतस्नन्यमतिजयः ननामयतिनरोदितिनहृष्यति ॥
नग्लायतियत्रवयंवदामोयत्रचाभिमृशामसि इत्यभिमृशति इतिजातकर्म्म ४ अथनामकर्म्म अथदशमेह
निसूतिकांचोत्थाप्यैकादशेहनिविहितदिनांतरेवापितानामकुर्यात् तत्रप्रथमंमातृपूजाभ्युदयिकादिकृत्वा
ब्राह्मणान्भोजयेत् कुमारंसंस्नाप्य अहतवासः परिधाप्यकृतस्वस्त्ययनंप्राङ्मुखंदक्षिणकर्णेअमुकशर्म्मासी
तित्रिः श्रावयति आयुर्वेदात्मकमंत्रः ओंअंगादङ्गादभिजातोसिहृदयादभिजायते आत्मावैपुत्रनामासितं ॥

जीवशरदांशतम् नामद्व्यक्षरंचतुरक्षरंसुखोद्यंशर्मान्तंब्राह्मणस्यवर्मान्तंक्षत्रियस्यगुप्तान्तंवैश्यस्यदासान्तं
शूद्रस्य इतिनामकर्म ५ अथनिष्क्रमणं तत्रचतुर्थमासिचंद्रतारानुकूलेदिनेस्नातमलंकृतंगृहाद्बहिरानी
यपितान्योवाब्राह्मणः सूर्य्यमुदीक्षयति ॐतच्चक्षुरित्यादिमंत्रेणतत्रफलपुष्पान्वितपत्र साभास्करस्याऽर्घोदे
यः इतिनिष्क्रमणम् ६ अथान्नप्राशनम् तत्रषष्ठेमासिचंद्रतारानुकूलशुभदिनेस्नातः शुचिराचांतः शुक्ला।
द्विवासः पितासूतिकागृहेस्वकुशकण्डिकांकुर्यात् तत्रकुशैर्हस्तपरिमितचतुरस्रभूमिंपरिसमूह्यतानै।
शान्यांनिःक्षिप्यगोमयोदकेनोपलिप्यस्फ्येनस्रुवेणवाप्रादेशमात्रमुत्तरोत्तरक्रमेणप्रागग्रंत्रिरुल्लिख्य उल्लेखन
क्रमेणानामिकांगुष्ठाभ्यांमृदंसमुद्धृत्यवारिणातंदेशमभ्युक्ष्य कांस्यपात्रस्थंवह्निंप्रत्यङ्मुखमुपसमाधाय ॐअ
द्यकर्तव्यान्नप्राश नहोमकर्म्मणिकृताकृतावेक्षणरूपब्रह्मकर्म्मकर्तुममुकगोत्रममुकशर्म्माणंब्राह्मणमेभिःपु
ष्पचंदनताम्बूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणे इतिब्रह्माणंवृणुयात् ॐवृतोस्मीतिप्रतिवचनं ॐयथाविहितंकर्म
कुर्वितियजमानेनोक्ते ॐकरवाणीतितेनोक्ते अग्नेर्दक्षिणतःशुद्धासननिधायतदुपरिप्रागग्रान्कुशानास्तीर्याग्र
ग्निंप्रदक्षिणंकारयित्वाब्रह्माणमुदङ्मुखंतत्रोपवेश्यास्मिन्नन्नप्राशनहोमकर्म्मणित्वम्मे ब्रह्माभवेत्यभिधाय।

ॐभवामीतितेनोक्तेप्रणीतापात्रंपुरतः कृत्वावारिणापरिपूर्यकुशैराच्छाद्यब्रह्मणोमुखमवलोक्याग्नेरुत्तरतोनि
दध्यात् ततःपरिस्तरणं वर्हिषश्चतुर्थभागमादायाग्नेयादीशानांतं ब्रह्मणोग्निपर्यंतं नैर्ऋत्याद्वायव्यांतं अग्नितःप्र
णीतापर्यंतं ततोग्नेरुत्तरतःपश्चिमदिशिपवित्रच्छेदनार्थंकुशत्रयं पवित्रकरणार्थंसाग्रमनंतर्गर्भकुशपत्रद्व
यं प्रोक्षणीपात्रंआज्यस्थाली चरुस्थालीसम्मार्जनकुशाः उपयमनकुशाःप्रादेशमितपलाशसमिधस्तिस्रः।
स्रुवः आज्यंषट्पंचाशदुत्तरयजमानमुष्टिशतद्व्यावच्छिन्नामतण्डुलपूर्णपात्रं चर्वर्थास्तण्डुलाः एतानिपवि
त्रच्छेदनकुशानांपूर्वपूर्वदिशि क्रमेणासादनीयानि ततःपवित्रच्छेदनकुशैर्यजमानप्रादेशमितपवित्रच्छेदनं
सपवित्रकरेणप्रणीतोदकंत्रिः प्रोक्षणीपात्रेनिधायद्वाभ्यामनामिकांगुष्ठाभ्यांमुत्तराग्रेपवित्रेगृहीत्वात्रिरुत्पवनंततःप्रो
क्षणीपात्रंसव्यहस्तेनगृहीत्वादक्षिणानामिकांगुष्ठाभ्यामुत्तराग्रेपवित्रेगृहीत्वात्रिरुद्गिंग
व्यह ततःप्रणीतोदकेनप्रोक्षणीपात्रमभ्युक्ष्य राम
प्रोक्षणीजलेनासादितवस्तुसेचनं अग्निप्रणीतयोर्मध्येप्रोक्षणीपात्रंनिदध्यात् ततआज्यस्थाल्यामाज्यंनिरु ७
प्य प्रणीतोदकेनतण्डुलान्प्रक्षाल्यचरुपात्रेप्रणीतोदकंदत्वातत्रतण्डुलान्प्रक्षिप्यस्वयंचरुंगृहीत्वाब्रह्माचा

ज्यं वन्हावुत्तरतश्चरुं दक्षिणतः आज्यं निदध्यात् ततः सिद्धे चरौ तृणादि प्रज्वाल्य उभयोरुपरि प्रदक्षिणं भ्रामयि
त्वा वन्हौ तत्प्रक्षेपः ततस्त्रिः श्रुवप्रतपनं सम्मार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यतः श्रुवं सम्मृज्य प्रणीतोदकेना
भ्युक्ष्य पुनस्त्रिः प्रतप्य दक्षिणतो निदध्यात् ततश्चाज्यमग्नितश्चरोः पूर्वेणानीयाग्रे धृत्वा आज्यपश्चिमेन चरुमा
नीयाज्यस्योत्तरतो निदध्यात् ततश्चाज्यस्य प्रोक्षणीवत्त्रिरुत्पवनं अवेक्ष्य सत्यपद्रव्ये तन्निरसनं ततः प्रोक्षणायुत्प
वनं तत उत्थाय उपयमनकुशान्वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः प्रक्षिपेत्
तत उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय ब्रह्मणान्वारब्धः पा
तितदक्षिणजानुः समिद्धतमेग्नौ जुहुयात् तत्र प्रथमाहुतिचतुष्टये तत्तदाहुत्यनंतरं श्रुवावस्थितहुतशेषस्य प्रोक्ष
णीपात्रे प्रक्षेपः ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ॐ इंद्राय स्वाहा इदमिंद्राय इत्याघारौ ॐ अग्नये।
स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय इत्याज्यभागौ ततोऽनन्वारब्धेनासाधारणाहुतिर्मंत्रः ॐ दे
वीं वाचमजनयंत देवास्तां विश्वरूपाः पशवो वदंति सा नो मंद्रेषमूर्ज्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहा इदं
वाचे द्वितीयाहुतिस्तु ॐ देवीं वाचमित्यादि मंत्रः ॐ वाजो नो अद्य प्रसवाति दानं वाजो देवाँ ऋतुभिः कल्पयति वाजो
ह्वयं तत्र प्रथमाहुति३

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

हिमासर्ववीरंजजाविश्वाआशावाजपतिर्जयेय ॐ स्वाहा इदंवाचेवाजाय इतिमंत्राभ्यां ततः स्थालीपाकेनाहुतिच
तुष्टयं ओंप्राणेनान्नमशीयस्वाहा इदंप्राणायओंअपानेगंधमशीयस्वाहा इदमपानायओंचक्षुषारूपाण्यशीयस्वा
हा इदंचक्षुषे ओंश्रोत्रेणयशोऽशीयस्वाहा इदंश्रोत्रायततोब्रह्मणान्वारब्धकर्तृकोहोमः तत्रततदाहुत्यनंतरंस्रुवा
वस्थितहुतशेषद्रव्यस्यप्रोक्षणीपात्रे प्रक्षेपः तत्रैवाज्यस्थालीपाकाभ्यांस्विष्टकृतं ओंअग्नयेस्विष्टकृतेस्वाहा इद
मग्नयेस्विष्टकृते ततआज्येनओंभूःस्वाहा इदंभूः ओंभुवःस्वाहा इदंभुवः ओंस्वःस्वाहा इदंस्वः एतामहाव्याहृतयः ओं
त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषा ॐ सिप्रमुमु
ग्ध्यस्मत्स्वाहाइदमग्नीवरुणाभ्यां ओंसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौअवयक्ष्वमाणोवरुण
ॐ रराणोवीहिमृडीकॐ सुहवोनएधिस्वाहा इदमग्नीवरुणाभ्यां ओंअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्वम
याअसि अयानोयज्ञंवहास्ययानोधेहिभेषज ॐ स्वाहा इदमग्नये ओंयेतेशतम्वरुणायेसहस्रंयज्ञियाःपाशा राम
विततामहान्तः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काः स्वाहाइदंवरुणायसवित्रेविष्णवेविश्वेभ्यो
स्वर्केभ्यः ओंउदुत्तमम्वरुणपाशमस्मदवाधमम्विमध्यमॐ श्रथाय अथावयमादित्यव्रतेतवानागसोअदि
देवेभ्योमरुद्भ्यः १

नयेस्वामस्वाहा इदंवरुणाय इतिसर्वप्रायश्चित्तं ॐप्रजापतयेस्वाहा इदंप्रजापतये इतिमनसा इतिप्राजापत्यं
अथसंस्रवप्राशनं ततआचम्य ॐमयाकृतेनदन्नप्राशनहोमकर्म्मणिकृताकृतावेक्षणरूपब्रह्मकर्म्मप्रति
ष्ठार्थमिदंपूर्णपात्रंप्रजापतिदैवतममुकगोत्रायामुकशर्म्मणेब्राह्मणायब्रह्मणेदक्षिणांतुभ्यमहंसंप्रददे इति
दक्षिणांदद्यात् ॐस्वस्तीतिप्रतिवचनंततःप्रणीताविमोकः ॐसुमित्रियानआपओषधयःसन्तु इतिपठि
त्वा पवित्राभ्यांप्रणीताजलमानीयतेनशिरःसम्मृज्य ॐदुर्म्मित्रायतस्मैसन्तुयोस्मान्द्वेष्टियञ्चवयंद्विष्मः इत्यै
शान्यांप्रणीतान्युब्जीकरणं ततस्तरणक्रमेणबर्हिरुत्थाप्याज्येनाभिघार्यहस्तेनैवजुहुयात् ॐदेवागातुविदोगा
तुंवित्वागातुमितमनसस्पतइमन्देवयज्ञं स्वाहावातेधाःस्वाहा इतिबर्हिर्होमः अथसर्वान्कटुमधुरलवणा।
दिरसान् सर्वाणिचशाल्यादीन्यन्नानियथासंभवमुद्धृत्यैकस्मिन्नुत्तमपात्रेकृत्वाकृतस्नानादिरलंकारादियुतो।
बालस्तूष्णीं ॐहंत इतिमंत्रेणवाअन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणःप्रप्रदातारन्तारिषऽऊर्ज्जन्नोधेहि।
द्विपदेचतुष्पदे इत्यनेनवाप्राशनीयं अथकुमारस्यवाक्प्रसरणकामेनभरद्वाजमांसेनअन्नाद्यकामेनकपिंज
लमांसेनमत्स्येनजवनकामस्य आयुःकामेनकृकलाषमांसेनब्रह्मवर्चसकामेनआटिमासेन सर्वफलकामेन

द.क. ९

कथितसर्वमांसैः कपिंजलः कवुश्चागोरतित्तिर इतिकेचित् प्रलाभेपिष्टकमयानांभरद्वाजप्रभृतीनामेकदेशः
प्राशयितव्यः ततश्चाचम्योत्थायफलमूलपुष्पसम न्वि त घृतेनश्रुवंपरिपूर्य्य ॐमूर्द्धानन्दिवोअरतिम्पृथि
व्यावैश्वानरमृतआजातमग्निंकवि ॐ सम्राजमतिथिञ्जनानामासन्ना पात्रंजनयंतदेवाःस्वाहा इतिमंत्रेण
पूर्णाहुतिंदद्यात् ततउपविश्यभस्मानीयदक्षिणानामिकाग्रगृहीतभस्मना ॐत्र्यायुषंजमदग्नेरितिललाटे।
ॐकश्यपस्यत्र्यायुषमितिग्रीवायां ॐयद्देवेषुत्र्यायुषमितिदक्षिणबाहुमूले ॐतन्नोअस्तुत्र्यायुषमितिहृदिअ
नेनैवक्रमेण कुमारललाटादावपितन्नाऽत्यत्रतन्नेअस्त्विति विशेषः ततोदूर्वाक्षतादिदानंब्राह्मणानांभोजनञ्च
इत्यन्नप्राशनम् ७ अथचूडाकर्म तत्रसंवत्सराभ्यंतरमादित्यादिशुद्धौ उदगयनआपूर्यमाणपक्षेशुक्रास्तादिदो
षरहितरिक्तादिदोषरहितसोमगुरुबुधशुक्रान्यतमवारविहितनक्षत्रसमन्वितायांतिथौकृतनित्यक्रियोयजमा
नोमातृपूजाभ्युदयिकादिकंकृत्वामण्डपेपरिस्कृतभूमौकुशकंडिकामारभेत् तत्रक्रमः कुशैर्हस्तमितांभूमि
परिसमूह्यतानैशान्यांपरित्यज्य गोमयोदकेनोपलिप्य श्रुवमूलेनप्रादेशमात्रंत्रिरुल्लिख्य उल्लेखनक्रमेणाना
मिकांगुष्ठाभ्यामुद्धृत्यवारिणातंदेशमभ्युक्ष्य कांस्यपात्रेणाग्निमानीयप्रत्यङ्मुखमग्नेरुपसमाधानंकुर्यात् ततोग्नेः

राम. ९

पश्चिमतो यजमानदक्षिणदिशि स्नापितमहतवासः परिधाप्य कुमारमंके निधाय माता उपविशति ततः पुष्पचंद
नताम्बूलवासांस्यादाय ॐ अद्य कर्तव्यचूडाकरणहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुममुकगोत्रममु
कशर्माणं ब्राह्मणमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्रह्माणं वृणुयात् ॐ वृतोस्मीति प्र
तिवचनं ॐ यथाविहितं कर्म कुर्विति यजमानेनोक्ते ॐ करवाणीति प्रतिवचनं ततो यजमानोऽग्नेर्दक्षिणतः शुद्धमा
सनं दत्वा तदुपरि प्रागग्रान्कुशाना स्तीर्य्याग्निं प्रदक्षिणं कारयित्वा अस्मिन्कर्म्मणि त्वं मे ब्रह्मा भवेत्यभिधाय ॐ
भवानीति तेनोक्ते ब्रह्माणमुदङ्मुखं तत्रोपवेश्य प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मु
खमवलोक्याग्नेरुत्तरतः कुशोपरि निद ध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादाय आग्नेयादीशानांतं
ब्रह्मणोऽग्निपर्यंतं नैर्ऋत्याद्वायव्यांतं अग्नितः प्रणीतापर्य्यंतं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्र
यं पवित्रकरणार्थं साग्रमनंतर्गर्भि कुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थाली सम्मार्जनकुशाः समिधस्तिस्रः स्रुवः
आज्यं षट्पंचाशदुत्तरयजमानमुष्टिशतद्वयावच्छिन्नामनतण्डुलपूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्र
मेण सादनीयानि अमीषामुत्तरोत्तरतो साधारणवस्तून्युपकल्पनीयानि तत्र शीतोदमुष्णोदकं घृतदधिनवनीता।

द.क. न्यनमः पिण्डः त्रिः श्वेतशल्लकीकंटकं साग्रसप्तविंशतिकुशपत्राणि लोहक्षुरः नापितः वृषभगोमयपिण्डः अन्न
१० दव्याचारान्नलिनीदलादि ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे
निधाय द्वाभ्यामनामिकांगुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं ततः प्रोक्षणीपात्रं वामहस्ते कृत्वानामिकां
गुष्ठगृहीतपवित्राभ्यां प्रोक्षणीजलं त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीपात्रमभ्युक्ष्य प्रोक्षणीजलेनासादितवस्तू
न्यभिषिंच्याग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् आज्यस्थाल्यामाज्यं कृत्वाधिश्रित्य ज्वलत्तृणादिकमादा
याज्यस्योपरि प्रदक्षिणं भ्रामयित्वा वन्हौ तत् क्षिपेत् ततस्त्रिः स्रुवप्रतपनं सम्मार्जनकुशानामग्रैरंतरतो मूलैर्वा
ह्यः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पूर्ववत्त्रिः प्रतप्य दक्षिणतो निदध्यात् ततोऽग्नितः प्रदक्षिणक्रमेणाज्यम
वतार्य्याग्रतो निदध्यात् ततः प्रोक्षणीवत्त्रिराज्योत्पवनं अवेक्ष्य सत्यपद्रव्ये तन्निरसनं पूर्ववत्प्रोक्षण्युत्पवनं तत
उत्थाय उपयमनकुशानामादाय वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः प्रक्षिपेत् त राम
नउपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रे कृत्वा ब्रह्मणान्वारब्धः पातित १०
दक्षिणजानुः समिद्धतमेऽग्नौ जुहुयात् तत्र प्रत्याहुत्यनंतरं स्रुवावस्थितहुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ॐ प्रजा।

पतयेस्वाहा इदंप्रजापतये १ इतिमनसा ॐइन्द्रायस्वाहा इदमिन्द्राय २ इत्याघारौ ॐअग्नयेस्वाहा इदमग्नये ३ ॐ
सोमायस्वाहा इदंसोमाय ४ इत्याज्यभागौ ॐभूःस्वाहा इदम्भूः ५ ॐभुवःस्वाहाइदम्भुवः ६ ॐस्वःस्वाहा इदंस्वः
७ एतामहाव्याहृतयः ॐत्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः यजिष्ठोवह्नितमःशोशुचा
नोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहाइदमग्नीवरुणाभ्यां ८ ॐसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोऽअस्याउ
षसोव्युष्टौ अवयक्ष्वनोवरुणꣳ रराणोवीहिमृडीकꣳ सुहवोनएधिस्वाहा इदमग्नीवरुणाभ्यां ९ ॐअयाश्चा
ग्नेस्यनभिशस्तिपाश्चसत्वमयाअसि अयानोयज्ञंवहास्ययानोधेहिभेषजꣳस्वाहाइदमग्नये १० ॐयेतेश
तंवरुणयेसहस्रंयज्ञियाःपाशावितताम्महान्तः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतःस्वर्काःस्वाहा
इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः ११ ॐउदुत्तमंवरुणपाशमस्मदवाधमंवि मध्य
मꣳश्रथाय अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा इदंवरुणाय १२ इतिसर्वप्रायश्चित्तं।
ॐप्रजापतयेस्वाहा इदंप्रजापतये १३ इतिमनसा इतिप्राजापत्यं ॐअग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृ
ते १४ इतिस्विष्टकृत् अथसंस्रवप्राशनंततआचम्य ॐअद्यामुष्यकुमारस्यकृतेनचूडाकरणहोमकर्म्मणिकृ

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

द॰क॰ ११ नाकृतावेक्षणरूपब्रह्मकर्म्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्म्मणे ब्राह्मणाय ब्रह्म
णे दक्षिणां तुभ्यमहं संप्रददे इति ब्रह्मणे दक्षिणां दद्यात् ॐ स्वस्तीति वचनं ततो ब्रह्मग्रंथिविमोकः ततॐ सुमित्रि
या न आप ओषधयः संतु इति पवित्राभ्यां प्रणीताजलमानीय तेन शिरः सम्मृज्य ॐ दुर्म्मित्रियास्तस्मै संतु योस्मा
न्द्वेष्टि यं च वयं द्विष्मः इत्यैशान्यां प्रणीतान्युब्जीकरणं ततस्तरणक्रमेण वर्हिरुत्थाप्याज्येनाभिघार्य ॐ देवागा
तुविदो गातुं वित्वा गातुमित मनसस्पत इमं देव यज्ञꣳ स्वाहा वाते धाः स्वाहा इति मंत्रेण वर्हिर्होमः अथ शीतोदकमु
ष्णोदकेन ॐ उष्णेन वा उदकेनेह्यदितिः केशान्वप इति मंत्रेणाभिषिच्य तत्र मिश्रितोदके नवनीताद्यन्यतमपिण्डं तू
ष्णीं प्रक्षिप्य दक्षिणपश्चिमोत्तरक्रमेण पूर्वनिशावद्धकुमारकेशजूटिकात्रये दक्षिणजूटिकां ॐ सवित्रा प्रसूता दै
व्या आप उदंतु ते तनुं दीर्घायुत्वाय वर्च्चसे इति मंत्रं पठित्वा तेनैव मिश्रितवारिणा प्रक्षाल्य तेनोदक्षिणभागस्थितजू
टिकाभागत्रयं कुर्यात् तत्र एकां एकां जूटिकां प्रति कुशपत्रत्रयसंयोजनं कुर्यात् शल्लकीकंटकेन तूष्णीं विवरणं कृ
त्वा भागत्रयं कुर्यात् ततः सप्तविंशति कुशपत्रतः पत्रपत्रमानीय तत्केशमूलसंलग्नाग्रं जूटिकाप्रथमभागमध्यांत राम
रितं कुर्यात् ॐ ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः इति मंत्रेण लोहक्षुरं गृहीत्वा ॐ निवर्तयाम्यायुषेन्नाद्याय प्रज ११

ननायरायस्पोषायसुप्रजास्त्वायसुवीर्याय इतिमंत्रेणजूटिकासंलग्नंकुर्यात् ततःकुशपत्रत्रयसहितांजूटिकांछि
नत्ति ओंयेनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान्तेनतेब्रह्मणोवपतेदमस्यायुष्यंजरदष्टिर्यथासत् इ
तिमंत्रेणपश्चिमजूटिकाच्छेदनंकुर्यात् ततस्तान्लूनकुशपत्रत्रयसहितान् अनुडुहगोमयपिण्डोपरिउत्तरस्यांनि
दध्यात् अत्रैवपूर्वप्रक्षालितपरभागद्वयेकुशपत्रत्रितयान्तर्निधानादिछेदनवर्ज्जंतत्सर्वंपूर्ववदेव छेदनंतूष्णीं ततःप
श्चिमजूटिकायांपूर्ववत्तेनैव मंत्रेणप्रक्षालनंतूष्णींशल्लकीकंटकेनभागत्रयकरणंकेशमूलसंलग्नाग्रके
शान्तरितमध्यकुशपत्रत्रयधारणंक्षुरग्रहणंतत्संयोजनानितत्तन्मंत्रेणैवतत्रप्रथमजूटिकाच्छेदनेमंत्रः ओं।
त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषं यद्देवेषुत्र्यायुषंतन्नोअस्तुत्र्यायुषंइतिमंत्रेणछित्वाततःपूर्ववद्गोमयपिण्डो
परिनिदध्यात्तत्रावशिष्टभागद्वयेकुशपत्रत्रयंकेशान्तर्निधानादिच्छेदनवर्ज्जंसर्वंपूर्ववदेवच्छेदनंतूष्णीमेवलू
नकुशपत्रत्रयकेशानांगोमयपिण्डोपरिधारणंचततउत्तरभागजूटिकायां।प्रक्षालनादिक्षुरसंयोजनान्तेषुपूर्वव
त्तत्तन्मंत्रप्रयोगः प्रथमभागजूटिकायांछेदनेमंत्रः ओंयेनभूरिश्चरादिवंज्योक्चपश्चाद्धिसूर्यंतेनतेवपामिब्रह्मणा
जीवातवेजीवनायसुश्लोक्यायस्वस्तयेततःकेशान्गोमयपिण्डोपरिनिदध्यात् ततोऽवशिष्टभागद्वयेकुशपत्रत्रयं।

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

द॰क॰ केशांतर्निधानादिच्छेदनवर्ज्जं सर्वं पूर्ववद्देवच्छेदनं तूष्णींगोमयादिपिण्डोपरिधारणमपि ततः समस्तंशिरःप्रक्षा
१२ ल्यत्रिः केशोपरिक्षुरंप्रदक्षिणक्रमेणानु केशान्भ्रामयति ओंयत्क्षुरेणमज्जयतासुपेशसावप्तावावपतिकेशाञ्छिं
धिशिरोमास्यायुःप्रमोषीः इतिमंत्रेण ततस्ताभिरेवाद्भिःसमस्तंशिरःप्रक्षाल्य ओंअक्षण्वंपरिवय इतिनापितायक्षु
रंप्रयच्छति अथनापितःशिखांधृत्वासमस्तशिरोवपनंयथाकुलंवाकुर्यात् तांश्चकेशान्ननववस्त्रेणप्रतीक्ष्यमानादधि
भक्तदुग्धसमन्वितगोमयपिण्डोपरिनिदध्यात् इतिसमाचारपूर्ववत्पूर्णाहुतिः ओंमूर्द्धानन्दिवोअरतिंपृथिव्यावै
श्वानरमृतआजातमग्निङ्कविꣳसम्राजमतिथिंजनानामासन्नापात्रंजनयन्तदेवाःस्वाहा इतिमंत्रेणपूर्णाहुतिः
ततउपविश्यस्रुवेणभस्मानीयदक्षिणानामिकाग्रगृहीतभस्मनात्र्यायुषंकुर्यात् ओंत्र्यायुषञ्जमदग्नेरितिललाटे
ओंकश्यपस्यत्र्यायुषमितिग्रीवायां ओंयद्देवेषुत्र्यायुषमितिदक्षिणबाहुमूले ओंतन्नोऽअस्तुत्र्यायुषमितिहृदिअ
नेनैवक्रमेणकुमारललाटादावपि तत्रततेअस्तुइतिविशेषः तत्रतृतीयेवर्षेपंचमेवापुष्येंदुचित्राहरिरेवत्यन्य रम
तमनक्षत्रसमन्वितेरिक्तातिरिक्ततिथिपूर्वाह्णेपितान्योवापूर्वाभिमुखोपविष्टःकुमारस्यमधुरंदत्वा ओंभद्रङ्कर्णेभिःशृणु १२
यामदेवाभद्रंपश्येमाक्षभिर्यजत्राःस्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितंयदायुः इतिमंत्रेणदक्षिणक
ततोदूर्वाक्षतादिगृहणं ततस्तान्केशान्सगोमयपिंडान्गोष्ठेसरितीरेवानिदध्यात् ततःआचाङ्गोज्यादिकं इतिचूडाकरणं अथकर्णवेधः॥३॥

र्णमभिमंत्र्य ॐवक्ष्यन्तीवेदागनीगन्तिकर्णम्प्रियꣳसखायम्परिषस्वजानायोषेवशिङ्क्ते विततधिधन्वञ्ज्याइय
ꣳसमनेपारयंत इतिमंत्रेणवामकर्णमभिमंत्रयेत् ततोमध्यंवीध्यनापितद्वारावेधयेत् तस्मिन्समयेमधु
रादिदानंसमाचारात् ततोब्राह्मणभोजनम् इतिकर्णवेधः ॐश्रीगणेशायनमः॥ अथोपनयनं तत्रशुद्धस
मयेरविगुरुचंद्रतारादिशुद्धौजन्मतोगर्भाष्टमेऽब्देवानुकल्पेषोडशसंवत्सराभ्यंतरेब्रह्मवर्चसकामस्यपंच
मेष्युदगयनआपूर्य्यमाणपक्षेऽनध्यायषष्ठीरिक्तादितिरिक्ततिथौरविगुरुशुक्रान्यतमवारेमध्यान्हादर्वाक्
कुमारपित्राभ्युदयिकेकृतेतदभावेआचार्य्येणैवकृते ब्राह्मणान्माणवकंचभोजयित्वासशिखकृतक्षौर।
स्नानानंतरंयथाशक्त्यलंकृतशिशुंकृत्वा वहिःशालायांतुषकेशशर्करादिशून्यपरिस्कृतभूमौआचार्य्यो
ग्निस्थापनंकुर्यात् तत्रहस्तमात्रपरिमितचतुरस्रभूमिंकुशकरणकसमूहनानंतरंगोमयोदकेनोपलि
प्यस्रुवमूलेनप्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेणत्रिरुल्लिख्यउल्लेखनक्रमेणानामिकांगुष्ठाभ्याम्मृदमु
द्धृत्यजलेनाभ्युक्ष्यनवीनकांस्यपात्रेणाग्निमानीयस्वाभिमुखंनिदध्यात् ततःकुमारमाचार्यःशिष्यद्वाराग्नेःप
श्चाद्दक्षिणपार्श्वेऽवस्थापयति ततःकुमारंवद्धांजलिंसंबोधयति ॐब्रह्मचर्य्यमागामितिब्रूहि इतिप्रेषानंतरंॐ।

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

ब्रह्मचर्यमागामिति कुमारश्चाह ततः ॐ ब्रह्मचार्यसानीति ब्रूहीत्याचार्येणोक्ते ॐ ब्रह्मचार्यसानीति कुमारश्चाह
अथ माणवकमाचार्यो वासः परिधापयति तत्र आचार्यपठनीयो मंत्रः ॐ येनेन्द्राय बृहस्पतिर्वासः पर्य्यदधादमृ
तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे ततो माणवकस्य द्विराचमनं अथ माणवकस्य वेष्टनत्रयेण
तत् प्रवरग्रंथियुतां मेखलामाचार्यो बध्नाति तत्र माणवकपठनीयो मंत्रः इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पु
नतीम आगात् प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयं ॐ युवा सुवासाः परिवीत आगात् स उश्रेया
न्भवति जायमानः तं धीरासः कवय उन्नयंति स्वाध्यो मनसा देवयंत इति वा ततः आचार्यो यज्ञोपवीतं सहितभांडा
ष्टनयं ब्राह्मणेभ्यो दत्वा तत्स द्यामुकगोत्रः स्वकीयोपनयनकर्मविषयक सत्संस्कारप्राप्त्यर्थं इदं भांडाष्टनयं सय
ज्ञोपवीतं सदक्षिणं यथानामगोत्रायेति ततो यज्ञोपवीतं परिदधाति माणवकः ॐ यज्ञोपवीतमिति मंत्रस्य परमे
ष्ठी ऋषिर्लिंगोक्ता देवता त्रिष्टुप् छंदो यज्ञोपवीतपरिधाने विनियोगः ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सह
जं पुरस्तात् आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः इति मंत्रेण ततः ऐणेयमजिनं तूष्णीं परिधत्ते त
तो माणवककेशपरिमितपालाशदंडमाचार्यः तूष्णीं तस्मै प्रयच्छति तं च यो मे दंड इति प्रजापतिऋषिर्दंडो देवताय

णुर्दंडग्रहणे विनियोगः यो मे दंडः परापतद्वैहायसोधिभूम्यां तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसाय इति
मंत्रेण माणवको गृह्णाति ततआचार्यो वारिणा स्वमंजलिं पूरयित्वा कुमारस्यांजलिं तेनैवांजलिजलेन पूरयति ॐ।
आपो हिष्ठा मयो भुवस्तान ऊर्ज्जे दधातन। महे रणाय चक्षसे॥ यो वः शिवतमो रसस्तस्य भाजयते हनः। उशतीरिव
मातरः॥ ॐ तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च न इति ऋग्भिः ततः सूर्यमुदीक्षस्वेति आचार्य।
प्रेषानंतरं ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्र।
वाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् इत्यनेनादित्यं पश्यति अथ कुमारस्य दक्षिणांसं
हृदयं दक्षिणहस्तेन स्पृशन्नाचार्य्यः ॐ मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते अस्तु मम वाचमेकमनाजु
षस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यं इति मंत्रेण ततः कुमारस्य दक्षिणहस्तं गृहीत्वा तं पृच्छति को नामासि श्री अमुकशर्मा
अहं भो इति कुमार आह कस्य ब्रह्मचार्यसीत्याचार्यः भवत इति कुमार आह पुनराचार्यो भाषते ॐ इंद्रस्य ब्रह्मचार्य
स्यग्निराचार्य्यस्तवाहमाचार्य्यः श्री अमुकशर्मन् अथ माणवकं बद्धांजलिं पूर्वादिदिक्षु प्रदक्षिणमुपस्थानं कारयति
अथाचार्यो माणवकं भूतेभ्यः परिददाति तत्र आचार्य्यस्य मंत्रपाठः ॐ प्रजापतये त्वा परिददामीति प्राच्यां ॐ देवाय त्वा

सवित्रे परिददामि इति दक्षिणस्यां ॐ अद्भ्यस्त्वौषधीभ्यः परिददामि इति प्रतीच्यां ॐ द्यावापृथिवीभ्यां त्वा परिदद
मि इति उदीच्यां ॐ विश्वेभ्यस्त्वा देवेभ्यः परिददा मि इत्यधः ॐ सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्यै इत्यूर्द्ध्वं ततो
ग्निं प्रदक्षिणीकृत्य आचार्य्यदक्षिणदिशि उपविशति माणवकः ततः पुष्पचंदनतांबूलवासांस्यादाय ततः ॐ मद्य क
र्त्तव्योपनयनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्त्तुं ममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनं
तांबूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्राह्मणं वृणुयात् ॐ वृतोस्मीति प्रतिवचनं पुष्पचंदनतांबूलवस्त्राण्यादा
य अद्य कर्त्तव्योपनयनकर्म्मणि होतृत्वकर्म्मकर्त्तुं अमुकगोत्रममुकशर्म्माणं ब्राह्मणमेभिः पुष्पचंदनतांबूलवा
सोभिः होतृत्वेन त्वामहं वृणे इति होतारं वृणुयात् स्वस्तीति प्रतिवचनं ॐ यथा विहितं कर्म्म कुर्व्वित्याचार्य्येणोक्ते ॐ
करवाणीति ब्राह्मणो वदेत् ततोग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान्कुशानास्तीर्य्य ब्रह्माणमग्निं प्रद
क्षिणं कारयित्वास्मिन्कर्म्मणि त्वम्मे ब्रह्मा भवेत्यभिधाय भवानीति तेनोक्ते तदुपरि ब्राह्मणमुदङ्मुखमुपवेश्य ततः
प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् त
तः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्नेयादीशानांतं ब्रह्मणोग्निपर्यंतं नैरृत्याद्वायव्यांतं अग्नितः प्रणीतापर्यंतं।

ततोग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रार्थं साग्रमनंतर्गर्भकुशपत्रद्वयं प्रोक्षणीपात्रं आ
ज्यस्थाली संमार्ज्जनार्थं कुशाः उपयमनकुशाः समिधस्तिस्रः स्रुवः आज्यं षट्पंचाशदुत्तराचार्यमुष्टिशतद्व
यावच्छिन्नं तंडुलपूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि ततः पवित्रच्छेदनकु
शैः पवित्रे छित्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय अनामिकांगुष्ठाभ्यां गृहीतपवित्रा
भ्यां तज्जलं किंचित्त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीं त्रिरभिषिच्य प्रोक्षणीजलेनासादितवस्तुसेचनं कृ
त्वाऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् आज्यस्थाल्यामाज्यनिर्वापः अधिश्रयणं ततः कुशं प्रज्वा
ल्याज्योपरि प्रदक्षिणं भ्रामयित्वा वन्हौ तत्प्रक्षिप्य स्रुवं त्रिः प्रतप्य संमार्जनकुशानामग्रैरंतरतो मूलैर्वा
ह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य दक्षिणतो निदध्यात् ततः आज्यमग्नेरवतार्य त्रिः
प्रोक्षणीवदुत्पूयावेक्ष्य सत्यपद्रव्ये तन्निरसनं कृत्वा पुनः प्रोक्षण्युत्पवनं ततः उत्थायोपयमनकुशान्वामह
स्तेकृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्तास्तिस्रः समिधः प्रक्षिपेत् उपविश्य सपवित्रप्रोक्षण्युदकेन प्र
दक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय पातितदक्षिणजानुः ब्रह्मणान्वारब्धः समिद्धतमेग्नौ

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

द॰क॰ स्रुवेणाज्याहुतीर्जुहोति तत्रतत्तदाहुत्यनंतरंस्रुवावस्थितघृतशेषस्यप्रोक्षणीपात्रेप्रक्षेपः ॐप्रजापतयेस्वा
१५ हाइदंप्रजापतये इतिमनसा ॐइंद्रायस्वाहाइदमिंद्रायइत्याघारौॐअग्नयेस्वाहाइदमग्नये ॐसोमायस्वा
हा इदंसोमाय इत्याज्यभागौ ॐभूःस्वाहा इदंभूः ॐभुवःस्वाहाइदंभुवः ॐस्वःस्वाहा इदंस्वःएतामहाव्या
हृतयः ॐत्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषा
ꣳसिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यांॐसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ अवय
क्ष्वणोवरुणꣳ रराणोवीहिमृडीकꣳ सुहवोनएधिस्वाहा इमग्नीवरुणाभ्यां ॐअयाश्चाग्नेस्यनभिशस्तिपाश्च
सत्वमित्वमयाअसि अयानोयज्ञंवहास्ययानोधेहिभेषजꣳस्वाहा इदमग्नये ॐयेतेशतंवरुणांयेसहस्रंयज्ञि
याःपाशावितता महांतः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतः स्वर्काःस्वाहा इदंवरुणायसवित्रेविष्ण
वेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय अथावयमादित्यव्रते
तवानागसोअदितयेस्यामस्वाहा इदंवरुणाय एताःसर्वप्रायश्चित्तसंज्ञकाः ॐप्रजापतयेस्वाहाइदंप्रजापतयेइ राम
तिमनसाप्राजापत्यम् ॐअग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते इतिस्विष्टकृद्धोमः ततःसंस्रवप्राशनं आच १५

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

मनंच ततोब्रह्मणोदक्षिणादानं ॐअद्यएतस्मिन्नुपनयनहोमकर्म्मणिकृताकृतावेक्षणरूपब्रह्मकर्म्मप्रतिष्ठार्थ
मिदंपूर्णपात्रंप्रजापतिदैवतंअमुकगोत्रायामुकशर्म्मणेब्राह्मणायब्रह्मणोदक्षिणांतुभ्यमहंसंप्रददे इतिदक्षि
णांदद्यात् ॐस्वस्तीति प्रतिवचनं ततोब्रह्मग्रंथिविमोकः ततः ॐसुमित्रियानआपओषधयः संतु इतिपवित्राभ्यां
जलमानीयतेनशिरः संमृज्य ॐदुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः इत्यैशान्यांप्रणीतान्युब्जीकर
णं ततस्तरणक्रमेणवर्हिरुत्थाप्यघृतेनाभिघार्यहस्तेनैवजुहुयात् ॐदेवागातुविदोगातुंवित्वागातुमितमन
सस्पतइमंदेवयज्ञं स्वाहा वातेधाः स्वाहा इतिवर्हिर्होमः ततआचार्य्यःकुमारस्यानुशासनंकरोति ॐब्रह्मचा
र्य्यसीत्याचार्य्यः ॐअसानीतिब्रह्मचारी ॐअपोऽशानइत्याचार्य्यः ॐअशानीतिकुमारआह ॐकर्मकुर्वित्याचा
र्य्यः ॐकरवाणीतिमाणवकः ॐमादिवासुषुप्सइत्याचार्य्यः नस्वपानीतिकुमारः ॐवाचंयच्छइत्याचार्य्यः ॐया
च्छानीतिकुमारः ॐसमिधमाधेहीत्याचार्य्यः ॐआदधानीतिमाणवकः ॐअपोऽशानेत्याचार्य्यः ॐअशानीति
कुमारः अथाग्नेरुत्तरतः प्रत्यङ्मुखायोपविष्टायाचार्य्यचरणोपसंग्रहणपूर्वकमुपसन्नायाचार्य्यः समीक्ष्यमाण
याचार्य्यः स्वयमपिसमीक्षितामास्मैविवारितंशंवतूष्णींदिशः ददृक्ष्यं शकेसावित्रीमन्वाहतत्रप्रथमात्तनो ॐभू

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

 भुर्वः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ओंपुनर्वारद्वयं अत्र तु सहपाठो विशेषः अ
थमाणवकस्याचार्य्यदक्षिणादिशि अग्निपश्चिमोपविश्य घृताक्तशुष्कनिषिद्धेतरैंधनेन जुहुयात् ततः ओं अग्ने सु
श्रवः सुश्रवसं मा कुरु ओं यथा त्वमग्ने सुश्रवः सुश्रवा असि ओं एवं मां सुश्रवः सौश्रवसं कुरु ओं यथा त्वमग्ने दे
वानां यज्ञस्य निधिपा असि ओं एवमहं मनुष्याणां वेदस्य निधिपो भूयासम् ततः प्रदक्षिणमग्निं वारिणा पर्यु
क्ष्य उत्थाय स्वप्रादेशमितां घृताक्तपलाशसमिधमादाय ओं अग्नये समिधमा[illegible]र्षं बृहते जातवेदसे यथा त्व
मग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिंधे जीवपुत्रो ममाचार्य्यो
मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहा इति मंत्रेण जुहुयात् एवं स
मिदंतरद्वयं जुहुयात् ओं अग्ने सुश्रवः सुश्रवसं मा कुरु ओं यथा त्वमग्ने सुश्रवः सुश्रवा असि ओं एवं मां सुश्रवः॥
सौश्रवसं कुरु ओं यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि ओं एवमहं मनुष्याणां वेदस्य निधिपो भूयासम् ततः
प्रदक्षिणमग्निं पर्युक्ष्य तूष्णीं पाणी प्रतप्य मुखंप्रतिमंत्रांतेऽवमृशति ओं तनूपा अग्नेऽसि तन्वं मे पाहि ओं आयुर्दा अग्ने
स्यायुर्मे देहि ओं वर्चोदा अग्नेऽसि वर्चो मे देहि ओं अग्ने यन्मे तन्वा ऊनं तन्म आपृण ओं मेधां मे देवः सविता आदधातु।

ॐमेधांमेदेवीसरस्वतीआदधातु ॐमेंधांअश्विनौदेवावाधत्तांपुष्करस्रजौ ततः सर्वगात्रादिषु दक्षिणपाणिनास्य
र्शः अत्रप्रत्येकंमंत्रः ॐअंगानिचमआप्यायताम् इति सर्वगात्रालंभने ॐवाक्चमआप्यायतामिति मुखालं
भने ॐप्राणश्चमआप्यायतामितिनासिकयोः ॐचक्षुश्चमआप्यायतामिति चक्षुषोः ॐश्रोत्रंचमआप्याय
तामितिश्रोत्रे ॐयशोबलंचमआप्यायतामितिमंत्रपाठमात्रं ततोदक्षिणकरानामिकाग्रगृहीतभस्मनाललाटे
ग्रीवायांदक्षिणबाहुमूलेहृदिच त्र्यायुषंकुर्यात् तत्रयथा संख्येनमंत्रचतुष्टयं ॐत्र्यायुषंजमदग्नेः इतिललाटे
ॐकश्यपस्यत्र्यायुषम् इतिग्रीवायां ॐयद्देवेषुत्र्यायुषम् इतिदक्षिणबाहुमूले ॐतन्नोअस्तुत्र्यायुषम् इ
तिहृदि ततोव्यस्तपाणिभ्यांपृथिवींस्पृशन्नभिवादनंकुर्यात् तत्रप्रकार ॐअमुकगोत्रोहममुकप्रवरोहममु
कशर्म्माहंभोवैश्वानरत्वामभिवादये ततोऽनेनैवक्रमेणसंबोध्यवरुणमभिवाद्याचार्य्यंतथैवाभिवादये
त् ततः आयुष्मान्भवसौम्येत्याचार्य्योब्रूयात् ततोभिक्षापात्रमादायप्रथमंमातुः सकाशात् ॐभवतिभिक्षां
मेदेहि इतिप्रार्थनानंतरंतद्दत्तां चादायाचार्य्यायनिवेदयेत् तथैवभिक्षांतंयाचेत् ततः आचार्य्येणाभ्यनु
नुज्ञातोभिक्षांस्वीकुर्य्यात् ततः फलपुष्पचंदनघृतपूर्णस्रुवेणब्रह्मचारिदक्षिणकरस्पृष्टेनाचार्य्यः पूर्णाहुति

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

दद्यात् तत्र मंत्रः ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निं कविꣳ सम्राजमतिथिं जनानामास
न्ना पात्रं जनयंत देवाः स्वाहा इदमग्नये ततः स्रुवेण भस्मानीय दक्षिणानामिकाग्रगृहीतभस्मना ॐ त्र्यायुषं जम
दग्नेः इति ललाटे ॐ कश्यपस्य त्र्यायुषम् इति ग्रीवायां ॐ यद्देवेषु त्र्यायुषम् इति दक्षिणबाहुमूले ॐ तन्नो
अस्तु त्र्यायुषम् इति हृदि इति त्र्यायुषं कुर्यात् कुमारपक्षे तन्नो इत्यस्य स्थाने तत्ते इति विशेषः अथ क्षारलवण
मधुमांसादिनिवृत्तिः उद्वर्तनजलस्नानदंडकृष्णाजिनधारणवृक्षारोहणविषमभूमिलंघननग्नस्त्रीनिरीक्षणस्त्री
संभोगव्यसनव्यावृत्तिरूपा ब्रह्मचारिणो नियमाः तद्दिने ब्रह्मचारी वाग्यतो ऽहःशेषं स्थित एवं गमयेत् ततः सायं
संध्यां कृत्वा तस्मिन्नेवाग्नौ पूर्ववत्पर्युक्षणपरिसमूहनं कृत्वा वाचं विसृजेत् परिसमूहनं तु शुष्कनिषिद्धेतरेंधन
स्याग्नौ प्रक्षेपः ततः संध्यामुपास्य प्रतिदिनं सायं प्रातरपि ब्रह्मचारिणा कर्त्तव्या अथ वेदारंभः तत्र कृतनित्यक्रिय आ
चार्य्यः कुशैर्हस्तमात्रपरिमितां भूमिं परिसमूह्य तान्कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवमूलेन उत्त एम
रोत्तरतः प्रागग्रं प्रादेशमात्रं त्रिरुल्लिख्य उल्लेखनक्रमेणानामिकांगुष्ठाभ्यामुद्धृत्य जलेनाभ्युक्ष्य कांस्येनाग्निमा १७
नीयाभिमुखमुपसमाधाय पुष्पचंदनतांबूलवस्त्राण्यादाय ॐ अद्य कर्त्तव्यवेदारंभहोमकर्म्मणि कृताकृतावे

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

स्मरणरूपब्रह्मकर्मकर्त्तुममुकगोत्रममुकशर्म्माणं ब्राह्मणमेभिः पुष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेन त्वामहं
वृणे इति ब्राह्मणं वृणुयात् ओं वृतोस्मीति प्रतिवचनं ओं यथाविहितं कर्म्म कुर्विन्त्याचार्य्यः ओं करवाणीति तेनोक्ते
अग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रान्कुशानास्तीर्य्य ब्रह्माणमग्निप्रदक्षिणक्रमेणाभ्रामयित्वा
अस्मिन्कर्म्मणि त्वं मे ब्रह्मा भवेत्यभिधाय ओं भवानीति तेनोक्ते ब्रह्माणमुदङ्मुखं तत्रोपवेश्य प्रणीतापा
त्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ततः प
रिस्तरणं बर्हिषश्चतुर्थभागमादाय आग्नेयादीशानांतम् ब्रह्मणोग्निपर्य्यंतम् नैर्ऋत्याद्वायव्यांतम् अग्नि
तः प्रणीतापर्य्यंतं ततोग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनंतर्गर्भं
कुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाली संमार्ज्जनकुशाः उपयमनकुशाः समिधस्तिस्रः स्रुवः आज्यपू
र्णपात्रं पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि ततः पवित्रच्छेदनकुशैः पवित्रे छित्त्वा सप
वित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय द्वाभ्यामनामिकांगुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरु
त्पवनं ततः प्रोक्षणीपात्रं वामहस्ते गृहीत्वा दक्षिणहस्तानामिकांगुष्ठाभ्यां त्रिरुद्दिंगनम् ततः प्रणीतोद

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

केनप्रोक्षणीपात्रमभ्युक्ष्य प्रोक्षणीजलेनयथासादितवस्तून्यभिषिच्याग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रंनिद
ध्यात् ततआज्यस्थाल्यामाज्यंनिरूप्याधिश्रयणम् ततः कुशंप्रज्वाल्याज्यस्याग्नेश्चोपरिप्रदक्षिणंभ्रामयित्वाचा
मौनत्प्रक्षेपः ततस्त्रिः स्रुवप्रतपनं संमार्जनकुशानामग्रैरंततोमूलैर्बाह्यतः स्रुवंसंमृज्यप्रणीतोदकेनाभ्यु
क्ष्यपुनस्त्रिःप्रतप्यस्रुवंदक्षिणतोनिदध्यात् ततआज्यमग्निंप्रदक्षिणंभ्रामयित्वाततआज्यस्याग्नेरवतार
णंततआज्येप्रोक्षणीवदुत्पवनं अवेक्ष्यसत्यपद्रव्येतन्निरसनंततप्रोक्षण्युत्पवनंततउत्थायोपयमनकु
शानादाय प्रजापतिंमनसाध्यात्वातूष्णीमग्नौघृताक्ताःसमिधस्तिस्रः क्षिपेत् ततउपविश्यसपवित्रप्रोक्षण्यु
दकेनप्रदक्षिणाक्रमेणाग्निंपर्युक्ष्यप्रणीतापात्रेपवित्रेविधायब्रह्मणान्वारब्धःपातितदक्षिणजानुःसमि
द्धतमेग्नौजुहुयात् तत्रप्रथमाहुतिचतुष्टयेनस्रुवावस्थितहुतशेषघृतस्यप्रोक्षणीपात्रेप्रक्षेपः ॐप्रजापतये
स्वाहा इदंप्रजापतये इतिमनसा ॐइंद्रायस्वाहा इदमिंद्राय इत्याघारौ ॐअग्नयेस्वाहा इदमग्नये ॐसोमाय
स्वाहा इदंसोमाय इत्याज्यभागौ ततः प्राक्ततोऽनन्वारब्धकर्तृकोहोमः ॐअंतरिक्षायस्वाहा इदमंतरिक्षाय ॐवा
यवेस्वाहा इदंवायवे ॐब्रह्मणेस्वाहा इदंब्रह्मणे ॐछंदोभ्यःस्वाहा इदंछंदोभ्यः एतासामान्याहुतयः ॐप्रजा

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

पतये स्वाहा इदं प्रजापतये इति मनसा ओं देवेभ्यः स्वाहा इदं देवेभ्यः ओं ऋषिभ्यः स्वाहा इदं ऋषिभ्यः ओं श्रद्धायै
स्वाहा इदं श्रद्धायै ओं मेधायै स्वाहा इदं मेधायैः ओं सदसस्पतये स्वाहा इदं सदसस्पतये ओं अनुमतये स्वाहा इदम
नुमतये ततोऽन्वारब्धकर्तृको होमः तत्तदाहुत्यनंतरं श्रुवावस्थित हुतशेषघृतस्य प्रोक्षणीपात्रे प्रक्षेपः ओं भूः
स्वाहा इदं भूः ओं भुवः स्वाहा इदं भुवः ओं स्वः स्वाहा इदं स्वः एता महाव्याहृतयः ओं त्वन्नोऽअग्ने वरुणस्य विद्वान्देवा
स्य हेडोऽअवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाᳪंसि प्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरु
णाभ्यां ओं स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ अवयक्ष्व णो वरुणᳪं रराणो वीहि मृडीकᳪं
सुहवो न एधि स्वाहा इदमग्नीवरुणाभ्यां ओं अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्व मया असि अया नो यज्ञं
वहास्यया नो धेहि भेषजᳪं स्वाहा इदमग्नये ओं ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो
अद्य सवितोत विष्णुर्विश्वे मुंचंतु मरुतः स्वर्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्के
भ्यः ओं उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमᳪं श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम
स्वाहा इदं वरुणाय इति सर्वप्रायश्चित्तसंज्ञकाः ओं प्रजापतये स्वाहा इदं प्रजापतये इति मनसा इति प्राजापत्यं ओं

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते इति स्विष्टकृद्धोमः ततः संस्रवप्राशनम् ततआचम्य ॐअद्यकृतैत
द्वेदारंभहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थंइदंपूर्णपात्रंप्रजापतिदैवतममुकगोत्रायामु
कशर्म्मणेब्राह्मणायब्रह्मणेदक्षिणांतुभ्यमहंसंप्रददे इतिदक्षिणांदद्यात् ॐस्वस्तीतिवचनं ततोब्रह्मग्रंथिवि
मोकः ॐसुमित्रियानआप ओषधयःसंतुइतिपवित्राभ्यांप्रणीताजलमानीयतेनशिरःसंमृज्य ॐदुर्मित्रियास्त
स्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मइतिमंत्रेणऐशान्यांप्रणीतान्युब्जीकुर्य्यात् ततस्तरणक्रमेणवर्हिरानीयघृ
तेनाभिघार्य्यहस्तेक्रमेणैवजुहुयात् ॐदेवागातुविदोगातुंवित्वागातुमितमनसस्पतइमंदेवयज्ञꣳस्वाहा
वातेधाःस्वाहा इतिवर्हिर्होमःततः ततइष्टांसकेवेदारंभंगुरुःकारयेत् तत्रक्रमः ॐभूर्भुवःस्वःतत्सवितुर्वरे
ण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् ॐ इतिप्रणवांतंपठित्वापंक्तिनमस्कारंचकारयित्वा ॐसमिधा
ग्निंदुवस्यतघृतैर्बोधयतातिथिम् अस्मिन्हव्याजुहोतनःसुसमिद्धायशोचिषे इतिकंडिकांतरंवाफक्किकांवापा
ठयेत् ततःसप्रणवंस्वस्तिवाचयित्वा उत्थायफलयुष्पसमन्वितब्रह्मचारिदक्षिणकरस्पृष्टेनघृतपूर्णेनपूर्णा
हुतिंदद्यात् ॐमूर्द्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निंकविꣳसम्राजमतिथिंजनानामासन्ना पम
१९

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

पात्रंजनयंतदेवाः इतिपूर्णाहुतिः ततउपविश्यस्रुवेणभस्मानीयदक्षिणानामिकाग्रेणगृहीतभस्मनात्र्यायुषंजम
दग्नेरितिललाटे ॐकश्यपस्यत्र्यायुषमितिग्रीवायां ॐयद्देवेषुत्र्यायुषं इतिदक्षिणबाहुमूले ॐतन्नोअस्तुत्र्या
युषमितिहृदि अनेनैवक्रमेणब्रह्मचारिललाटावपि तत्रतन्नेइतिविशेषः इतिवेदारंभः अथसमावर्त्तनंतत्र
शुभेदिने प्रह्वीभूयआचार्य्यस्नास्यामीतिकुमारआचार्य्यंभाषते तत्रस्नाहीत्याचार्य्यः ततोब्रह्मचारिणिआचा
र्य्यसन्निहितदक्षिणादिशि उपविष्टेकृतस्नानादिराचार्य्यःकुशैर्हस्तमात्रांभूमिंपरिसमूह्यतानैशान्यांपरित्यज्य
गोमयोदकेनोपलिप्यस्रुवमूलेनोत्तरोत्तरक्रमेणत्रिरुल्लिख्यउल्लेखनक्रमेणमृदमुद्धृत्यजलेनाभ्युक्ष्यकांस्यपा
त्रेणाग्निमानीयप्रत्यङ्मुखंनिदध्यात् ततःपुष्पचंदनतांबूलवासांस्यादाय ॐअद्यामुकगोत्रस्यामुकशर्म्मणः
कर्त्तव्यसमावर्त्तनहोमकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्त्तुममुकगोत्रममुकशर्म्माणंब्राह्मणमेभिःपु
ष्पचंदनतांबूलवासोभिर्ब्रह्मत्वेनत्वामहंवृणे वृतोस्मीतिप्रतिवचनं यथाविहितंकर्मकुर्वित्यभिधाय ॐकरवा
णीतितेनोक्ते ततःअग्नेर्दक्षिणतः शुद्धमासनंदत्वा तदुपरिप्रागग्रान्कुशानास्तीर्य्यास्मिन्कर्म्मणि त्वंमेब्रह्माभवे
त्यभिधाय ॐभवानीतितेनोक्ते ब्राह्मणमुदङ्मुखंतत्रोपवेश्य ततःप्रणीतापात्रंपुरतःकृत्वावारिणापरिपूर्य्यकुशै

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

द॰क॰ गाच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्ने
२० यादीशानांतं ब्रह्मणोऽग्निपर्य्यंतं नैर्ऋत्याद्वायव्यांतं अग्नितः प्रणीतापर्य्यंतं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्र
च्छेदनार्थं कुशत्रयम् पवित्रकरणार्थं साग्रमनंतर्गर्भकुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थाली संमार्जनार्थं
कुशाः उपयमनकुशाः समिधस्तिस्रः स्रुवः आज्यं पूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासाद
नीयानि ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधायानामि
कांगुष्ठाभ्यां पवित्रे गृहीत्वा त्रिरुत्पूय प्रोक्षणीपात्रं वामकरेणादायानामिकांगुष्ठगृहीतपवित्राभ्यां तज्जलं किं
चित्त्रिः प्रक्षिप्य प्रणीतोदकेन प्रोक्षणीमभ्युक्ष्य प्रोक्षणीजलेन यथासादितवस्तून्यभिषिच्याग्निप्रणीतयोर्मध्ये
प्रोक्षणीपात्रं निदध्यात् ततः आज्यस्थाल्यामाज्यनिर्वापः अधिश्रयणं ततस्तृणं प्रज्वाल्याज्यमग्नेश्चोपरि प्रद
क्षिणं भ्रामयित्वा वह्नौ तत्प्रक्षिप्य स्रुवं त्रिः प्रतप्य संमार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदके
नाभ्युक्ष्य पुनः प्रतप्य स्रुवस्य दक्षिणतो निदध्यात् ततः आज्यमग्निं प्रदक्षिणं भ्रामयित्वा उत्तार्य त्रिः प्रोक्षणीवदुत्पू एम
यावेक्ष्य सत्यपद्रव्ये तन्निरसनं कृत्वा पुनः पूर्ववत्प्रोक्षण्युत्पवनम् ततउत्थायोपयमनकुशान्वामहस्ते कृत्वा प्रा २०

जापतिंमनसाध्यात्वातूष्णीमग्नौघृताक्ताः समिधस्तिस्रः क्षिपेत् ततउपविश्यसपवित्रप्रोक्षण्युदकेनप्रदक्षि
णाक्रमेणाग्निंपर्युक्ष्यप्रणीतापात्रेपवित्रेनिधायपातितदक्षिणजानुः समिद्धतमेग्नौब्रह्मणान्वारब्धःस्रुवे
णाज्याहुतीर्जुहुयात् तत्रप्रथमाहुतिचतुष्टये प्रत्याहुत्यनंतरंस्रुवावस्थितहुतशेषघृतस्यप्रोक्षणीपात्रेप्र
क्षेपः ॐ प्रजापतयेस्वाहा इदंप्रजापतये इतिमनसा ओंइंद्रायस्वाहा इदमिंद्राय इत्याघारौ ओंअग्नयेस्वा
हा इदमग्नये ओंसोमायस्वाहा इदंसोमाय इत्याज्य भागौ ततोऽन्वारब्धकर्तृकोहोमः ओंअंतरिक्षायस्वाहा
इदमंतरिक्षाय ओंवायवेस्वाहा इदंवायवे ओंब्रह्मणेस्वाहा इदंब्रह्मणे ओंछंदोभ्यःस्वाहा इदंछंदोभ्यः ओं
प्रजापतयेस्वाहा इदंप्रजापतये इतिमनसा ओंदेवेभ्यःस्वाहा इदंदेवेभ्यः ओंऋषिभ्यःस्वाहा इदंऋषिभ्यः ओंश्रद्धा
यैस्वाहा इदंश्रद्धायै ओंमेधायैस्वाहा इदंमेधायै ओंसदसस्पतयेस्वाहा इदंसदसस्पतये ओंअनुमतयेस्वाहा इद
मनुमतये ततोब्रह्मणाऽन्वारब्धोजुहुयात् अत्राहुतिदशतयेततदाहुत्यनंतरंस्रुवावस्थिताज्यस्यप्रोक्षणीपात्रे
प्रक्षेपः ओंभूःस्वाहा इदंभूः ओंभुवःस्वाहा इदंभुवः ओंस्वःस्वाहा इदंस्वः एतामहाव्याहृतयः ओंत्वन्नोअग्नेवरुणस्य
विद्वान्देवस्यहेडोअवयासिसीष्ठाः यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीव

द॰क॰ २१ रुणाभ्यां ॐसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौअवयक्ष्वणोवरुणꣳरराणोवीहिमृडीकꣳसुह
वोनएधिस्वाहा इदमग्नीवरुणाभ्यां ॐअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्वमयाअसि अयानोयज्ञंवहा
स्यधानोधेहिभेषजꣳस्वाहा इदमग्नये ॐयेतेशतंवरुणंयेसहस्रंयज्ञियाःपाशाविततामहान्तःतेभिर्नोअ
द्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्क्काःस्वाहा इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्क्के
भ्यः ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमꣳश्रथाय अथावयमादित्यव्रतेतवानागसोअदितयेस्याम
स्वाहा इदंवरुणायइतिसर्वप्रायश्चित्तं ॐप्रजापतयेस्वाहा इदंप्रजापतये इतिमनसा इतिप्राजापत्यम् ॐ
अग्नयेस्विष्टकृतेस्वाहा इदमग्नयेस्विष्टकृते इतिस्विष्टकृतंततःसंस्रवप्राशनम् ततआचम्य ॐअद्यकृतैत
त्समावर्त्तनहोमकर्म्मणिकृताकृतावेक्षणरूपब्रह्मकर्म्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदैवतममुकगोत्रा
यामुकशर्मणेब्राह्मणायब्रह्मणेदक्षिणांतुभ्यमहंसंप्रददेइतिदक्षिणांदद्यात् ॐस्वस्तीतिप्रतिवचनंततोब्र राम
ह्मग्रंथिविमोकःततःपवित्राभ्यांप्रणीताजलेन ॐसुमित्रियानआपओषधयःसंतु इतिमंत्रेणशिरःसंमृज्य ॐ २१
दुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्म इतिमंत्रेणैशान्यांप्रणीतान्युब्जीकरणंततस्तरणक्रमेणबर्हिरा

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

नीयघृतेनाभिघार्यहस्तेनैवजुहुयात् ॐदेवागातुविदोगातुंवित्वागातुमितमनसस्पतइमंदेवयज्ञꣳस्वाहावा
तेधाःस्वाहा इतिबर्हिर्होमःततोब्रह्मणान्वारब्धकर्तृककर्मततोग्निपश्चिमोपविष्टोब्रह्मचारिपरिसमूहनं
कुर्यात् तत्रघृताक्तशुष्कनिषिद्धेतरैंधनेनपंचाहुतीर्हस्तेनैवजुहुयात् ॐअग्नेसुश्रवःसुश्रवसंमाकुरु ॐय
थात्वमग्नेसुश्रवःसुश्रवाअसि ॐएवंमाꣳसुश्रवःसौश्रवसंकुरु ॐयथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसि
एवमहंमनुष्याणांवेदस्यनिधिपोभूयासम् ततःप्रदक्षिणमग्निंवारिणापर्युक्ष्य उत्थायघृताक्तांप्रादेशमित
समिधमादायजुहुयात् तत्रमंत्रः ॐअग्नयेसमिधमाहार्षंबृहतेजातवेदसेयथात्वमग्नेसमिधासमिध्यसए
वमहमायुषामेधयावर्च्चसाप्रजयापशुभिर्ब्रह्मवर्च्चसेनसमिंधेजीवपुत्रोममाचार्योमेधाव्यहमसान्यनिराकरि
ष्णुर्यशस्वीतेजस्वीब्रह्मवर्चस्यन्नादोभूयासंस्वाहा ततःसमिद्द्वयमनेनैवक्रमेणप्रत्येकंहुत्वाउपविश्यतेनैव
क्रमेणपंचाहुतीर्घृताक्ताःशुष्कनिषिद्धेतरैंधनेनजुहुयात् ॐअग्नेसुश्रवःसुश्रवसंमाकुरु ॐयथात्वमग्नेसुश्रवः
सुश्रवाअसि ॐएवंमाꣳसुश्रवःसौश्रवसंकुरु ॐयथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसि ॐएवमहंमनुष्याणांवे
दस्यनिधिपोभूयासम् ततःप्रदक्षिणमग्निंवारिणापर्युक्ष्यतूष्णींपाणीप्रतप्यमुखंप्रतिमंत्रंतेनविमृशति ॐतनू।

इ॰क॰ २२ गात्रमग्नेसितन्त्वंमेपाहि ओंआयुर्दाअग्नेस्यायुर्मेदेहि ओंवर्च्चोदाअग्नेसिवर्च्चोमेदेहि ओंअग्नेयन्मेतन्वाऊनंतन्म
आपृण ओंमेधांमेदेवःसविताआदधातु ओंमेधांमेदेवीसरस्वतीआदधातु ओंमेधांमेअश्विनौदेवावाधत्तांपुष्क
रस्त्रजौ तत्रसर्वगात्रादिषुदक्षिणपाणिनास्पर्शः तत्रप्रत्येकंमंत्रः ओंअंगानिचमआप्यायन्ताम् इतिसर्वगात्रा
लंभनेवाक्चमआप्यायतामितिमुखालंभने ओंप्राणश्चमआप्यायतामितिनासिकयोः ओंचक्षुश्चमआप्यायता
मितिचक्षुर्द्वयस्पर्शः ओंश्रोत्रंचमआप्यायतामितिश्रोत्रद्वयस्पर्शः ओंयशोवलंचमआप्यायतामितिमंत्रपाठ
मात्रम् ततोदक्षिणानामिकाग्रगृहीतभस्मनाललाटेग्रीवायांदक्षिणंवाहुमूलेहृदिचत्र्यायुषंकुर्यात् यथासं
ख्येनमंत्रचतुष्टयम् ओंत्र्यायुषंजमदग्नेरितिललाटे ओंकश्यपस्यत्र्यायुषं इतिग्रीवायां ओंयद्देवेषुत्र्यायुषं इति
दक्षिणवाहुमूले ओंतन्नोअस्तुत्र्यायुषं इतिहृदि ततोव्यस्तपाणिभ्यांपृथिवींस्पृशन् प्रथमंवैश्वानरंसंवोध्याभि
वादयेत् तत्रामुकगोत्रोहममुकप्रवरोहममुकशर्माहंभोवैश्वानरत्वामभिवादयेइतिप्रकारः ततस्तथैववरु राम
णंसंवोध्याभिवादयेत् तथैवाचार्य्यंचाभिवादयेत् ततःआयुष्मान्भवसौम्यइत्याचार्योब्रूयात् ततोग्नेरुत्तरतःप्रा २२
गग्रान्कुशानास्तीर्यतदुपरिदक्षिणोत्तरक्रमेणासादितवारिपूर्णकलशाष्टतयेकलशानांपुरतःप्रागग्रेषुकुशेषु

स्थित्वा एकस्मादाम्रपल्लवेनोदकं गृहीत्वा ॐ येष्वंतरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोहा स्खलो विरुजा।
स्तनूदूषुरिंद्रियहा तान्विजहामि यो रोचनस्तमिह गृह्णामि इति मंत्रेण ततस्तेन मामभिषिंचामि श्रियै यशसे ब्रह्म
णे ब्रह्मवर्चसाय इत्यात्मानमभिषिंचति ततो द्वितीयघटस्य मुदकं गृहीत्वाऽम्रपल्लवेनाभिषिंचति ॐ येन श्रियमकृ
णुतां येनावमृशतां सुरां येनाक्षावभ्यषिंचतां यद्वां तदश्विना यशः इति मंत्रेण ततस्तेनैव क्रमेण तृतीयकलशस्य जल
मादाय ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन महे रणाय चक्षसे इति मंत्रेणाभिषिंच्य तेनैव क्रमेण चतुर्थक
लशस्य जलमादाय ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः इति मंत्रेणाभिषिंच्य पंचमकल
शस्य जलं तथैवादाय ॐ तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च न इति मंत्रेणाभिषिच्य ततो व
शिष्टकलशत्रितयजलं तथैव प्रत्येकं गृहीत्वा तूष्णीं प्रत्येकमभिषिंचति ततो मेखलामोचनं शिरोभागेन ॐ उदुत्तमं व
रुणपाशमस्मदवाधमं विमध्यमं श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम इति मंत्रेण दंडकृ
ष्णाजिने तूष्णीं भूमौ निधाय अन्यद्वस्त्रं परिधायोत्तरीयं चवस्त्वाचम्य बद्धांजलिरादित्यमुपतिष्ठति ब्रह्मचारी ॐ।
उद्यन्भ्राजिभृष्णुरिंद्रो मरुद्भिरस्थात्प्रातर्यावभिरस्थात् दशसनिरसि दशसनिं मा कुर्वाविदन्मा गमय उद्यन्भ्राजि

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

भूर्भुरिंद्रोमरुद्भिरस्थात् दिवायावभिरस्थाच्छतसनिरसिशतसनिंमाकुर्वाविदन्मागमय उद्यन्भ्राजिभृष्णुरिंद्रो
मरुद्भिरस्थात्प्रातर्यावभिरस्थात् सहस्रसनिरसिसहस्रसनिंमाकुर्वाविदन्मागमय इतिमंत्रेण ततोदथिति।
स्नानंवामासस्नाचम्यनखरोमादींश्छेदयित्वास्नात्वाचम्यप्रादेशमितउदुंबरकाष्ठेनदंतधावनम् ओंअन्नाद्यायव्यू
हध्वं० सोमोराजायमागमत् समेमुखंप्रमार्क्ष्यतेयशसाचभगेनच इतिमंत्रेणततोदंतकाष्ठंपरित्यज्याचम्यसु
गंधिद्रव्येणोद्वर्तनानंतरंस्नात्वाद्विराचम्यचन्दनकुंकुमादिनानासिकायामुखस्यालंभने ओंप्राणापानौमेतर्प्पय
ओंचक्षुर्मेतर्प्पय ओंश्रोत्रंमेतर्प्पय इतिमंत्रेणानुलिंपति ततःपाणिप्रक्षाल्यदक्षिणाभिमुखःपातितवामजानुःकृ
तापसव्योद्विगुणभुग्नकुशत्रयतिलजलान्यादायआस्तृतकुशत्रयोपरिपितॄंस्तर्प्पयेत् ओंपितरःशुंधध्वमितिमं
त्रेण ततःसव्यंकृत्वा आचम्यानुलिप्यजपेत् ओंसुचक्षाअहमक्षीभ्यांभूयासंसुवर्चामुखेनसुश्रुत्कर्णाभ्यांभूयासमि
तिततोऽहतवासःपरिधानं ओंपरिधास्येयशोधास्येदीर्घायुत्वायजरदष्टिरस्मिशतंचजीवामिशरदःपुरूचीराय
स्पोषमभिसंव्ययिष्ये इतिमंत्रेण ततोयज्ञोपवीतपरिधानं यज्ञोपवीतमितिप्रज्यापतिरृषिर्यजुरुपवीतदेवतायज्ञो
पवीतपरिधानेविनियोगः ओंयज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञो।

पवीतंबलमस्तुतेजः इतिमंत्रेण द्वितीययज्ञोपवीतदानं यज्ञोपवीतमसियज्ञस्यत्वोपवीतेनोपनह्यामि आचमा
नं अथोत्तरीयं ॐ यशसामाद्यावापृथिवीयशसेन्द्राबृहस्पतीयशोभगश्चमाविदद्यशोमाप्रतिमंत्रेण ततः पुष्पमा
लाग्रहणे मंत्रः ॐ या आहरज्जमदग्निः श्रद्धायैमेधायैकामायेंद्रियाय ता अहं प्रतिगृह्णामि यशसाचभगेनच
इतिमंत्रेण पुष्पमालाग्रहणं ततः पुष्पमालापरिधानं ॐ यद्यशोऽप्सरसामिंद्रश्चकारविपुलंपृथुतेनसंग्रथिताः सु
मनसः आबध्नामियशोमयि इतिमंत्रेण पुष्पमालापरिधानं अथ वसुप्रतिष्ठा अथोष्णीषेण शिरोवेष्टनं ॐ युवासु
वासाः परिवीत आगात् स उ श्रेयान्भवतिजायमानः तं धीरासः कवय उन्नयंति स्वाध्यो मनसा देवयंत इतिमंत्रेण
ततः कुंडले परिदधाति ॐ अलंकरणमसिभूयोऽलंकरणं भूयात् ततोंजनं ॐ वृत्रस्यासिकनीनकश्चक्षुर्दा असि
चक्षुर्मेदेहि ततः आदर्शे आत्मदर्शनं ॐ रोचिष्णुरसि इतिमंत्रेण ततश्छत्रग्रहणं ॐ बृहस्पतेश्छदिरसिपाप्मनोमा
मंतर्द्धेहि तेजसो यशसो मामंतर्द्धेहि इतिमंत्रेण ततः पद्भ्यामुपानहौ प्रतिगृह्णाति ॐ प्रतिष्ठे स्थो विश्वतो मा पातम् इ
तिमंत्रेण ततो वैणवदंडधारणं ॐ विश्वाभ्यो मा नाष्ट्राभ्यः परिपाहि सर्वतः इतिमंत्रेण ततः स्नातकस्य नियमाः गानवा
दित्रनृत्यत्यागः ततः गमनं क्षेमे सति न रात्रौ ग्रामान्तरगमनं न धावेत् न कूपेऽवेक्षणं न वृक्षारोहणं न फलत्रोटनं॥

अमार्गेण न गच्छेत् नग्नो न स्नायात् न संधिसर्पणं न विषमभूमिलंघनं अश्लीलं नोपवदेत् उदिनास्तसमये सूर्यं नो
पपश्येत् जलमध्ये सूर्यं आकाशस्थं न पश्येत् देवे वर्षति न गच्छेत् उदके आत्मानं न पश्येत् अजातलोम्नीं प्रमा
तां पुरुषाकृतिं षंडं च न गच्छेदित्यादि ततआचार्य्यायवरं दक्षिणां दद्यात् ततः मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वा
नरमृत आजातमग्निं कवि ॰ सम्राजमतिथिं जनानामासन्नापात्रं जनयंत देवाः स्वाहा इति मंत्रेण फलपुष्पस
मन्वितं घृतपूर्णस्रुवेण माणवकदक्षिणकरस्पृष्टेन उत्थाय पूर्णाहुतिमाचार्य्यः कुर्य्यादिति ततउपविश्य स्रुवेण
भस्मानीय दक्षिणानामिकाग्रगृहीतभस्मना ओं त्र्यायुषं जमदग्नेरिति ललाटे ओं कश्यपस्य त्र्यायुषमिति ग्रीवायां
ओं यद्देवेषु त्र्यायुषमिति दक्षिणबाहुमूले तन्नो अस्तु त्र्यायुषमिति हृदि इति त्र्यायुषं कुर्य्यात् अनेनैव क्रमेण कुमा
रललाटादावपि तत्र तन्नोइत्यस्य स्थाने तन्ते इति विशेषः नमो मूर्द्धसंतानादिग्रहणं इति श्रीमहामनक महासामं
ताधिपति श्रीरामदत्तविरचिता वाजसनेयिनां उपनयनकर्मपद्धतिः समाप्ता ॥ ❀ ॥ अथ सामग्री रोली १२ राम
मौली ७ केसर २५ बतासे ३ आटा चावल पुष्प १२ पुष्पमाला धूप ३ दीप १ तांबूल ७ यज्ञोपवीत ९ प्रणीतापात्र। २४
३ प्रोक्षणीपा॰ ३ कांस्यपात्र ६ छायापा॰ १ सुवर्ण १ कुशा १ स्रुवा १ गोमय एरणे गोहे पलाश समिधा सेर ३ पूर्णपा

त्र ३ उपर्नै ५ धोतीया ५।२ कुपीनी ५ मृगचर्म १ पलाशदंड १ मूलरसाखा १ मेखलामूजकी १ सुहालीयासेर १॥ पुरवा ८ लोटिया ८ नारियेल २ खडावाजोडा १ पट्टी १ चंगेर १ लागी ५ गुथली १ कमारू २ घृत ॥ तिल ३ दधि १ सुपारी ११ आम्रपल्लववृक्षादिपत्र ७ अंजन १ दर्पण १ वसु ५ मौंनीउपानहो वठणा रेनदुर्वादोने १० अवीरश्चेन ६ ब्राह्मणभोजन दक्षिणा पंचरंग २५ इतिसामग्रीसमाप्ता॥ ॥ श्रीगणेशायनमः अथविवाहः तत्रकान्याहस्तेनषोडशहस्तमितंमंडपंतद्दक्षिणदिशिपश्चिमांदिशमाश्रित्यमंडपसंलग्नमुत्तराभिमुखंकौतुकागारंमंडपाद्वहिरैशान्यांदिशिजामातृचतुर्हस्तपरिमितसिकतादिपरिस्कृतंतुषकेशशर्करादिरहिताम्रम्यांवेदीनिर्मितांवेदीचकारयेत्त विवाहदिनेकृतनित्यक्रियेणजामातृपित्रामातृपूजापूर्वकमाभ्युदयिकंश्राद्धंकर्तव्यम् कन्यापितास्नातःशुचिःशुक्लांवरधरः कृतनित्यक्रियोमातृपूजाभ्युदयिके कृत्वा अर्हणवेलायांमंडपेप्रत्यङ्मुखंप्राङ्मुखंवरमूर्द्धजानुंनिष्ठंतंसंवोध्य ततःस्वस्तिवाचनंकलशगणेशादीनांपूजनंचकृत्वाॐसाधुभवानास्ताम्॥ मर्चयिष्यामोभवंतमितिब्रूयात् ॐअर्चयेतिवरेणोक्तेवरोपवेशनार्थंशुद्धमासनंदत्वाविष्टरमादाय ॐविष्टरोविष्टरोविष्टरइत्यन्येनोक्तेॐविष्टरःप्रतिगृह्यतामितिदातावदेत् ॐविष्टरंप्रतिगृह्णामिइत्यभिधायवरोविष्टरंगृही पश्चिमुखःपूर्वमुखः ४

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

द॰क॰ त्वा ॐ वर्ष्मोऽस्मीत्याथर्वण ऋषिर्विष्टरो देवतानुष्टुप्छन्द उपवेशने विनियोगः ॐ वर्ष्मोऽस्मि समानानामुद्यतामि
२५ व सूर्य्यः इमं तमभितिष्ठामि यो मां कश्चाभिदासति इत्यनेनासने उत्तराग्रं विष्टरोपरि वर उपविशति ततउपवि
ष्टयजमानः पाद्यमंजलिनादाय ॐ पाद्यं पाद्यं पाद्यमित्यन्येनोक्ते ॐ पाद्यं प्रतिगृह्यतामिति दाता वदेत् ॐ पाद्यं
प्रतिगृह्णामि इत्यभिधाय यजमानांजलितोंजलिना पाद्यमादाय वरः विराजो दोहोसीति प्रजापतिऋषिरापो देव
ता यजुः पादप्रक्षालने जलग्रहणे विनियोगः ॐ विराजो दोहोसि विराजो दोहमशीय मयि पाद्यायै विराजो दोह
इति दक्षिणपादं प्रक्षालयति अनेनैव क्रमेण वामचरणप्रक्षालनं ततः पूर्ववद्विष्टरांतरं गृहीत्वा चरणयोर
धस्तात् उत्तराग्रं वरः कुर्यात् ततो दूर्वाक्षतफलपुष्पचंदनयुतार्घपात्रं गृहीत्वा यजमानः ॐ अर्घो अर्घो अर्घः इत्यन्ये
नोक्ते ॐ अर्घः प्रतिगृह्यतामिति दाता वदेत् ॐ अर्घं प्रतिगृह्णामीत्यभिधाय यजमानहस्तादर्घं गृहीत्वा ॐ आपः
स्थ युष्माभिः सर्वान्कामानवाप्नुवानीति शिरस्यक्षतादिकं किंचिद्दत्वा ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छ राम
त अरिष्टास्माकं वीरा मा परासेचि मत्पयः इत्यर्घपात्रस्थं जलमैशान्यां दिशि त्यजन्पठति ततः आचमनीयमादाय २५
ॐ आचमनीयं आचमनीयं आचमनीयमित्यन्येनोक्ते ॐ आचमनीयं प्रतिगृह्यतामिति दाता वदेत् ततो वर आचम

णीयंप्रतिगृह्णामीत्यभिधाययजमानहस्तादाचमनीयमादायओंआमागन्यशसासꣳसृजवर्चसातंमाकुरुप्रियंप्र
जानामधिपतिंपशूनामरिष्टिंतनूनांइत्यनेनसकृदाचमेत् इतिद्विस्तूष्णींततोयजमानःकांस्यपात्रस्थदधिम
धुघृतानिकांस्यपात्रपिहितान्यादाय ओंमधुपर्कोमधुपर्कोमधुपर्कइत्यन्येनोक्ते ओंमधुपर्कःप्रतिगृह्यतां।
मितिदातावदेत् ओंमधुपर्कंप्रतिगृह्णामिइतिवरोवदेत् ओंमित्रस्यत्वाचक्षुषाप्रतीक्षे इतियजमानकरस्थमेव
निरीक्ष्य ओंदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीत्यनेनमधुपर्कंगृहीत्वावामहस्ते
कृत्वा ओंनमःश्यावास्यायान्नशनेयतआविद्धंतते निष्कृन्तामीत्यनामिकपात्रिःप्रदक्षिणमालोड्यअनामिकांगुष्ठा
भ्यांभूमौकिंचिन्निःक्षिपेत्पुनस्तथैवद्विःप्रत्येकंक्षिपेत्ततोवरःओंयन्मधुनइतिकुत्सऋषिर्मधुपर्कोदेवताज
गतीछन्दोमधुपर्कप्राशनेविनियोगःओंयन्मधुनोमधव्यंपरमꣳरूपमन्नाद्यंतेनाहंमधुनोमधव्येनपरमेण
रूपेणान्नाद्येनपरमोमधव्योन्नादोसानीत्यनेनवारत्रयंमधुपर्कप्राशनंप्रतिप्राशनेचैतन्मंत्रपाठःततोमधुपर्क
शेषमसंचरदेशेधारयेत्ततःद्विराचम्यओंवाङ्मआस्येस्तुनसोर्मेप्राणोस्तुअक्ष्णोर्मेचक्षुरस्तुकर्णयोर्मेश्रो।
त्रमस्तुबाह्वोर्मेबलमस्तुऊर्वोर्मेओजोस्तुओंअरिष्टानिमेंगानितनूस्तन्वामेसहसंतुइत्यास्यादिप्रत्येकंसर्वगात्रा।

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

णास्य स्पृष्ट्वा ॐ गौर्गौर्गौरित्यन्येनाभिहिते यजमानेन प्रत्युक्ते ततो वरः ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्या
नाममृतस्य नाभिः प्रणवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट मम चामुकशर्मणो यजमानस्यउ
भयोः पाप्मा हतः ॐ उत्सृजत तृणान्यत्त्विति तृणं क्षिपेत् ततो वेदिकायां तुषकेशशर्करादिरहितायां हस्तमात्रप
रिमितायां चतुरस्रां भूमिं कुशैः परिसमूह्य तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्फ्येन स्रुवेण वा प्रा
गग्रमादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यामुपांशु मुद्धृत्य जलेनाभ्युक्ष्य तत
स्तूष्णीं कांस्यपात्रस्थं वह्निमग्निकोणादानीय प्रत्यङ्मुखमुपसमाधाय तद्रक्षार्थं किंचिन्नियुज्य कौतुकागारा
द्वरः कन्यामानीय मंडपे उपविश्य ॐ जरां गच्छ परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपावा शतं च जीवामि शरदः
सुवर्चा रयिं च पुत्राननुसंव्ययस्वायुष्मतीदं परिधत्स्व वासः इति पठित्वा परिधानवस्त्रं तस्यै ददाति वरः ततः ॐ या अ
कृंतन्नवयंया आतन्वत याश्च देवीस्तंतूनभितो ततंथ तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः इति पठि
त्वोत्तरीयं ददाति ततो वरः ॐ परिधास्यै यशो धास्यै दीर्घायुत्वाय जरदष्टिरस्मि शतं च जीवामि शरदः पुरूची रायस्पोष
मभिसंव्ययिष्ये इति पठित्वा स्वयं वरः परिधत्ते ॐ यशसा मा द्यावापृथिवी यशसेन्द्रा बृहस्पती यशो भगश्च

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

माविद्धयद्यशोमाप्रतिपद्यताम् इतिपठित्वोत्तरीयंपरिदधातिवरः ततोवरस्यकन्यायाश्चद्विराचमनंततःका-
न्याप्रदेनपरस्परंसमंजेथां इतिप्रेषणंकन्यावरयोःपरस्परमभिमुखीकरणं ॐ समंजन्तुविश्वेदेवाःसमापो-
हृदयानिनौसंमातरिश्वासंधातासमुदेष्ट्रीदधातुनौ इतिवरःपठतिततःकन्याप्रदकर्तृकंगंधादिवसनंकन्या
वरयोः अथहस्तलेपनंशाखोच्चारणंपुनःकन्यादानं अथकन्यादानंस्नानाद्यंस्वस्थदूर्वाक्षतफलपुष्पचंदन।
जलान्यादायजामातृदक्षिणकरोपरिकन्यादक्षिणकरंनिधाय ॐ दाताहंवरुणोराजाद्रव्यमादित्यदैवतंवरोसौ
विष्णुरूपेणप्रतिगृह्णात्वयंविधिः इतिपठित्वागोत्रोच्चारणंकुर्यात् ॐ अद्यामुकमासेअमुकपक्षेमुकतिथौ अ-
मुकवासरे अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणःप्रपौत्राय अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणःपौ-
त्राय अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः पुत्रायअमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणःप्रपौत्रीं अमुक
गोत्रस्यामुकप्रवरस्यामुकशर्म्मणःपौत्रीम् अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणःपुत्रीम् इत्यनेनक्रमेणत्रि
रावर्त्यंपठनीयं अमुकगोत्राय अमुकप्रवराय अमुकशर्म्मणेवराय अमुकगोत्रां अमुकप्रवरां अमुकनाम्नींइ-
मांकन्यांसालंकारांप्रजापतिदैवतांवस्त्रयुग्मच्छन्नांज्योतिष्टोमातिरात्रियज्ञजन्यशतगुणितस्वर्गकामःपत्नीत्वेनतुभ्य
दिप्यणाम्: प्रपौत्रीकस्येयंभवतिदुहिताकस्यविदुषःपितुस्तातःकोस्यावदममपुरस्ताद्द्विजपतेकुलंकिंगोत्रंकिंप्रवरपरिमाणंकतिसर्वेश्रुतिःकासा

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

महंसंप्रददे ॐस्वस्तीतिप्रतिवचनं ॐद्यौस्त्वाददातुपृथिवीत्वांप्रतिगृह्णातु इतिवरःपठेत् ततःकन्याप्रदः ॐअद्यकृ
तैतत्कन्यादानप्रतिष्ठार्थंअमुंसुवर्णमग्निदैवतंअमुकगोत्रायअमुकप्रवरायअमुकशर्मणेवरायदक्षिणां
तुभ्यमहंसंप्रददे इतिदक्षिणांदद्यात् स्वस्तीतिप्रतिवचनं मोमिथुनंवादद्यात् ॐकोदात्कस्मादात्कामोदात्कामा
यादात्कामोदाता कामःप्रतिगृहीता कामैतत्ते इतिवरःपठेत् ततस्तांपाणौगृहीत्वा ॐयदैषिमनसादूरंदिशोनुप
वमानोवाहिरण्यपर्णोवैकर्णःसत्वामन्मनसांकरोतु श्रीअमुकदेवी इतिपठन्निष्क्रामति ततोवेदिंदक्षिणस्यां
दिशिवारिपूर्णकलशंऊर्ध्वंतिष्ठतोमौनिनोदृढपुरुषस्कंधे अभिषेकपर्यंतंधारयेत् ततःपरस्परंसमीक्षेयातां इति
कन्याप्रेषानंतरं ॐअघोरचक्षुरपतिघ्न्येधिशिवापशुभ्यःसुमनाःसुवर्चाःवीरसूर्देवकामास्योनाशन्नोभवद्विपदे
शंचतुष्पदे सोमःप्रथमोविविदेगंधर्वोविविदउत्तरस्तृतीयोग्निष्टेपतिस्तु रीयस्तेमनुष्यजाःसोमोददद्गंधर्वा
यगंधर्वोददद्ग्नयेरयिंचपुत्रांश्चादादग्निर्मह्यमथोइमांसानःपूषाशिवतमामेरयसानऊरूउशतीविहरयस्यामु
शंतःप्रहरामशेफंयस्यामुकामावहवोनिविष्ट्यै ४ इतिवरपठितमंत्रांते परस्परंनिरीक्षणं ततोग्निंप्रदक्षिणीकृत्यप राम
श्चादग्नेरहतवस्त्रवेष्टिततृणपूलकेकटेवातदुपरिदक्षिणंचरणंदत्वावधूंदक्षिणतःकृत्वातामुपवेश्यस्वयमुपवि २२

स्यवरःपुष्पचंदनताम्बूलवस्त्राण्यादायॐअद्यकर्तव्यविवाहहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मणांवृणुयात्
ॐवृतोस्मीतिप्रतिवचनंयथाविहितंकर्मकुरुइतिवरेणोक्ते ॐकरवाणीतिब्राह्मणोवदेत् ततोग्नेर्दक्षिणतः शुद्धमा
सनंदत्वातदुपरिप्रागग्रान्कुशानास्तीर्यब्रह्माणमग्नेःप्रदक्षिणक्रमेणानीयात्रत्वंमेब्रह्माभवेत्यभिधायकल्पि
तासनेउपवेशयेत् ॐअद्यकर्तव्यविवाहकर्मणिकृताकृतावेक्षणरूपआचार्यकर्मकर्तुममुकगोत्रममुकशर्मा
णंआचार्य्यंपुष्पचंदनतांवलवासोभिः आचार्यत्वेनत्वामहंवृणेॐवृतोस्मीतिप्रतिवचनंततःप्रणीतापात्रंपुरतः
कृत्वावारिणा पूर्यकुशैराच्छाद्यब्रह्मणोमुखमवलोक्यअग्नेरुत्तरतःकुशोपरिनिदध्यात् ततःपरिस्तरणंवर्हि
षश्चतुर्थभागमादायआग्नेयादीशानांतंब्रह्मणोग्निपर्यंतंनैर्ऋत्याद्वायव्यान्तंअग्नितःप्रणीतापर्य्यंतंततोग्नेरु
त्तरतःपश्चिमदिशिपवित्रविच्छेदनार्थंकुशत्रयंपवित्रकरणार्थंसाग्रमनंतर्गर्भकुशपत्रद्वयंप्रोक्षणीपात्रंआज्य
स्थालीसंमार्जनार्थंकुशत्रयंउपयमनार्थंवेणीरूपकुशत्रयंसमिधस्तिस्रःस्रुवआज्यंषट्पंचाशदुत्तरयजमानमु
ष्टिशतद्वयावच्छिन्नंतंडुलपूर्णपात्रंपवित्रच्छेदनकुशानांपूर्वपूर्वदिशिक्रमेणासादनीयानि अथतस्यामेवदिशि
असाधारणवस्तून्युपकल्पनीयानितत्रशमीपलाशमिश्राःलाजाद्दृषदुपलंकुमारीभ्राताशूर्प्यः दृढपुरुषःअन्य

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

दपितदुपयुक्तमालेपनादिद्रव्यंततःपवित्रच्छेदनकुशैः पवित्रेछित्वाततःसपवित्रकरेणप्रणीतोदकंत्रिःप्रोक्ष
णीपात्रेनिधायअनामिकांगुष्ठाभ्यांउत्तराग्रेपवित्रेगृहीत्वात्रिरुत्पवनंततः प्रोक्षणीपात्रस्यसव्यहस्तकरणंअ।
नामिकांगुष्ठाभ्यांपवित्रेगृहीत्वात्रिरुद्दिंगनंप्रणीतोदकेनप्रोक्षणीप्रोक्षणंप्रोक्षणीजलेनयथासादितवस्तुसेच
नंततोग्निप्रणीतयोर्मध्येप्रोक्षिणीपात्रंनिधानंआज्यस्थाल्यामाज्यनिर्वापःततोधिश्रयणंततोज्वलत्तृणादिनाह
विर्वेष्टयित्वाप्रदक्षिणक्रमेणवन्हौतत्प्रक्षेपःपर्यग्निकरणंततःस्रुवप्रतपनंकृत्वासंमार्जनकुशानामग्रैरंतरतोमू
लैर्बाह्यतःस्रुवसंमार्जनंप्रणीतोदकेनअभ्युक्ष्यपुनःप्रतप्यस्रुवंदक्षिणतोनिदध्यात् ततआज्यस्याग्नेरवतारणंत
तआज्येप्रोक्षणीवदुत्पवनंअवेक्ष्यसत्यपद्रव्येनिरसनंपुनःप्रोक्षण्युत्पवनंततः उपयमनकुशान्वामहस्तेना।
दायउत्तिष्ठन्प्रजापतिंमनसाध्यात्वातूष्णीमग्नौघृताक्तास्तिस्रःसमिधःक्षिपेत् ततउपविश्यसपवित्रप्रोक्षण्युद
केनप्रदक्षिणक्रमेणाग्निपर्युक्षणंकृत्वाप्रणीतापात्रेपवित्रेनिधायपातितदक्षिणजानुःकुशेनब्रह्मणान्वारब्धः
समिद्धतमेग्नौस्रुवेणाज्याहुतीर्जुहोतितत्राघारादारभ्यद्वादशाहुतिषुततदाहुत्यनंतरंस्रुवावस्थितशेषघृतस्यप्रो
क्षणीपात्रेप्रक्षेपः अथहवनम् ॐप्रजापतयेस्वाहा इदंप्रजापतये इतिमनसा ॐइंद्रायस्वाहा इदमिंद्रायइत्या

घारौ ॐअग्नयेस्वाहा इदमग्नये ॐसोमायस्वाहा इदंसोमाय इत्याज्यभागौ ॐभूःस्वाहा इदंभूः ॐभुवःस्वाहा इदंभु
वः ॐस्वःस्वाहा इदंस्वः एतामहाव्याहृतयः त्वन्नो अग्न इतिवामदेवऋषिरग्नीवरुणौदेवतेत्रिष्टुप्छंदो होमेवि
नियोगः ॐत्वन्नो अग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः यजिष्ठोवन्हितमःशोशुचानोविश्वाद्वेषांसि प्र
मुमुग्ध्यस्मत् स्वाहा इदमग्नीवरुणाभ्यां ॐसत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ अवयक्ष्वणोव
रुणँ रराणोवीहिमृडीकँ सुहवोनएधिस्वाहा इदमग्नीवरुणाभ्यां अयाश्चाग्न इतिवामदेवऋषिरग्निर्देवता
त्रिष्टुप्छंदः सर्वप्रायश्चित्तहोमेविनियोगः ॐअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्वमयाऽअसि अयानोयज्ञं
वहास्ययानोधेहिभेषजँ स्वाहा इदमग्नये ॐयेतेशतंवरुणयेसहस्रंयज्ञियापाशावितताम्महान्तः तेभिर्नो अ
द्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहा इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः
ॐउदुत्तमंवरुणपाशमस्मदवाधिमंविमध्यमँ श्रथाय अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा
इदंवरुणायएताःप्रायश्चित्तसंज्ञकाः ततोऽन्वारब्धं विना ॐप्रजापतयेस्वाहा इदंप्रजापतये ॐअग्नयेस्विष्टकृतेस्वा
हा इदमग्नये स्विष्टकृते उदकोपस्पर्शनं अथाराष्ट्रभृत्यः ॐऋताषाड्ऋतधामाग्निर्गंधर्वः सनइदंब्रह्मक्षत्रंपातुत।

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

द॰क॰ स्मैस्वाहा वाट् इदमृतासाहेऋतधाम्नेऽग्नयेगंधर्वाय ओंऋताषाड्ऋतधामाग्निर्गंधर्वस्तस्यौषधयोप्सरसोमु
२९ दोनामताभ्यःस्वाहा इदमोषधीभ्योऽप्सरोभ्यामुद्भ्यः ओंसꣳहितोविश्वसामासूर्य्योगंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मै
स्वाहा ३ इदꣳसꣳहिताय विश्वसाम्नेसूर्यायगंधर्वाय ओंसꣳहितोविश्वसामासूर्य्योगंगंधर्वस्तस्यमरीचयोप्सरसआय
वोनामताभ्यःस्वाहा वाट्इदंमरीचिभ्योप्सरोभ्यःआयुभ्यः४ ओंसुषुम्णाःसूर्यरश्मिश्चंद्रमागंधर्वःसनइदंब्रह्म
क्षत्रंपातुतस्मैस्वाहावाट् इदंसुषुम्णायसूर्यरश्मयेचंद्रमसेगंधर्वाय५ ओंसुषम्णाःसूर्यरश्मिश्चंद्रमागंधर्वस्तस्य
नक्षत्राण्यप्सरसोभेकुरयोनामताभ्यःस्वाहावाट्इदंनक्षत्रेभ्योप्सरोभ्योभेकुरुभ्यः६ ओंइषिरोविश्वव्यचावातोगंधर्वः
सनइदंब्रह्मक्षत्रंयातुतस्मैस्वाहावाट् इदमिषिरायविश्वव्यचसेवातायगंधर्वाय७ ओंइषिरोविश्वव्यचावातोगं
धर्वस्तस्यापोअप्सरसऊर्जोनामताभ्यः स्वाहा इदंमरुभ्योऽप्सरोभ्यऊर्गभ्यः८ ओंभुज्युःसुपर्णोयज्ञोगंधर्वः
सनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट् इदंभुज्यवेसुपर्णाययज्ञायगंधर्वाय९ ओंभुज्युःसुपर्णोयज्ञोगंधर्व
स्तस्यदक्षिणाप्सरसस्तावानामताभ्यःस्वाहावाट्इदंदक्षिणाभ्योऽप्सरोभ्यस्तावाभ्यः १० ओंप्रजापतिर्विश्वक राम
र्मामनोगंधर्वःसनइदंब्रह्मक्षत्रंपातुतस्मैस्वाहावाट्इदंप्रजापतयेविश्वकर्मणेमनसेगंधर्वाय ११ ओंप्रजा २९

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

पतिर्विश्वकर्मामनोगंधर्वस्तस्यऋक्सामान्यऽप्सरसोएष्टयोनामताभ्यःस्वाहा इदमृक्सामेभ्योऽप्सरोभ्यएष्टिभ्यः
१२ इतिराष्ट्रभृतः अथजयाहोमः ॐचित्तंचस्वाहा इदंचित्ताय ॐचित्तिश्चस्वाहा इदंचित्त्यै ॐआकूतंचस्वाहा इदमा
कूताय ॐआकूतिश्चस्वाहा इदमाकूत्यै ॐविज्ञातंचस्वाहा इदंविज्ञाताय ॐविज्ञातिश्चस्वाहा इदंविज्ञात्यै ॐमनश्च
स्वाहा इदंमनसे ॐशक्करीश्चस्वाहा इदंशक्करीभ्यः ॐदर्शश्चस्वाहा इदंदर्शाय ॐपौर्णमासंचस्वाहा इदंपौर्णमासाय।
ॐबृहच्चस्वाहा इदंबृहते ॐरथंतरंचस्वाहा इदंरथंतराय ॐप्रजापतिर्जयानिंद्रायवृष्णेप्रायच्छदुग्रः पृतनाज
येषुतस्मैविशःसमनमंतसर्वाःसउग्रःसइहव्योबभूवस्वाहा इदंप्रजापतयेजयानिंद्राय इतिजयाहोमः उदको
पस्पर्शनं ॐअग्निर्भूतानामधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म
ण्यस्यांदेवहूत्याꣳस्वाहा इदमग्नयेभूतानामधिपतये ॐइंद्रोज्येष्ठानामधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मि
न्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्याꣳस्वाहा इदमिंद्रायज्येष्ठानामधिपतये ॐयमः
पृथिव्याअधिपतिःसमावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्या।
ꣳस्वाहा इदंयमाय॰ पृथिव्याअधिपतये अत्रप्राशीतोदकस्पर्शः ॐवायुरंतरिक्षस्याधिपतिःसमावत्वस्मिन्ब्रह्मण्य

द. क. स्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्या ৺स्वाहाइदंवायवे ऽंतरिक्षस्याधिपतये ॐ
३० सूर्य्यो दिवोधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्या
৺स्वाहाइदंसूर्य्याय दिवोधिपतये ॐ चंद्रमानक्षत्राणामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्य
स्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्या ৺स्वाहा इदंचंद्रमसेनक्षत्राणामधिपतये ॐ बृहस्पतिर्ब्रह्मणोधिप
तिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मण्यस्यांदेवहूत्या ৺स्वाहा इदंबृह
स्पतयेब्रह्मणोधिपतये ॐ मित्रः सत्यानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधा
यामस्मिन्कर्मण्यस्यांदेवहूत्या ৺स्वाहाइदं मित्राय सत्यानामधिपतये ॐ वरुणोपामधिपतिः समावत्वस्मिन्
ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्या ৺स्वाहा इदंवरुणायापामधिप
तये ॐ समुद्रः स्रोत्यानामधिपतिः समावत्वस्मिन्ब्रह्मण्यस्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्य राम
स्यांदेवहूत्या ৺स्वाहाइदंसमुद्राय स्रोत्यानामधिपतये ॐ अन्न ঁ साम्राज्यानामधिपतिः समावत्वस्मिन्ब्रह्मण्य ३०
स्मिन्क्षत्रेस्यामाशिष्यस्यांपुरोधायामस्मिन्कर्म्मण्यस्यांदेवहूत्या ৺स्वाहा इदमन्नाय साम्राज्यानामधिपतये

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

ॐ सोम ओषधीनामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां
देवहूत्या ꣳ स्वाहा इदं सोमायौषधीनामधिपतये ॐ ओं सविताप्रसवानामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मि
न् क्षत्रेमाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या ꣳ स्वाहा इदं सवित्रे प्रसवानामधिपतये ॐ रुद्रः पशू
नामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या ꣳ स्वा
हा इदं रुद्राय पशूनामधिपतये अत्र प्रणीतोदकस्पर्शः ॐ त्वष्टा रूपाणामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मि
न् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या ꣳ स्वाहा इदं त्वष्ट्रे रूपाणामधिपतये ॐ विष्णुः प
र्वतानामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या
ꣳ स्वाहा इदं विष्णवे पर्वतानामधिपतये ॐ मरुतो गणानामधिपतयस्ते मावंत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रे स्यामा
शिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां देवहूत्या ꣳ स्वाहा इदं मरुद्भ्यो गणानामधिपतिभ्यः ॐ पितरः पिताम
हाः परेवरेततस्ततामहास्ते मावंत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्म्मण्यस्यां दे
वहूत्यां ꣳ स्वाहा इदं पितृभ्यः पितामहेभ्यः परेभ्योवरेभ्यस्ततेभ्यस्ततामहेभ्यः अत्र प्रणीतोदकोपस्पर्शनं इत्याभ्या

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

द॰क॰ ता नामकं ॐ अग्निरैतु प्रथमो देवतानां ꣳ सोस्यै प्रजां मुंचंतु मृत्युपाशात् तदयꣳ राजा वरुणोनुमन्यतां य
३१ थेयꣳ स्त्री पौत्रमघन्नरोदात्स्वाहा इदमग्नये ॐ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः अशू
न्योपस्था जीवितामस्तु माता पौत्रमानंदमभिविबुध्यतामियꣳ स्वाहा इदमग्नये ॐ स्वस्ति नो अग्ने दिवा पृथिव्या वि
श्वानि धेह्ययथा यजत्र यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रꣳ स्वाहा इदमग्नये ॐ सुगं
नुपंथां प्रविशन्नराहि ज्योतिष्मध्येह्यजरन्न आयुः अपैतु मृत्युरमृतं म आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहा इ
दं वैवस्वताय अत्र प्राशीतोदकस्पर्शनं ततन्नं अंतरपटं ॐ परं मृत्यो अनु परेहि पंथां यस्ते अन्य इतरो देवयानात् चक्षु
ष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान् स्वाहा इदं मृत्यवे अत्र प्राशीतोदकोपस्पर्शनं ततो वधूम
ग्रतः कृत्वा वरो वधूश्च द्वावपि प्राङ्मुखौ स्थितौ भवतः ततो वरांजलिपुटोपरिसंलग्नं वध्वंजलिस्थ घृताभिघारि
तं वधूभ्रातृदत्तशमीपलाशमिश्रैर्लाजैर्वधूकर्तृको मंत्रपाठपूर्वको होमः तत्र मंत्राः अर्य्यमणमित्याथर्वणऋषि राम
रग्निर्देवतानुष्टुप् छंदो लाजाहोमे विनियोगः ॐ अर्य्यमणं देवं कन्या अग्निमयक्षत स नो अर्य्यमा देवः प्रेतो मुंच ३१
तु मा पतेः स्वाहा इदमर्य्यम्णे देवाय ॐ इयं नार्युपब्रूते लाजानावपंतिका आयुष्मानस्तु मे पतिरेधंतां ज्ञातयो मम

मस्वा(हा) इदमग्नये ॐ इमाँल्लाजानावपाम्यग्नौ समृद्धिकरणं तवममतुभ्यचसंवननं तदग्निरनुमन्यतामियꣳ स्वाहा
इदमग्नये ततोवरोवधूदक्षिणहस्तंसांगुष्ठंगृह्णाति ॐ गृभ्णामिते सौभगत्वायहस्तंमयापत्याजरदष्टिर्यथासः भगो
अर्यमासविता पुरंधिर्मह्यंत्वा दुर्गार्हपत्यायदेवाः अमोहमस्मि सात्वꣳ सात्वमस्यमो अहं सामाहमस्मि ऋक्त्वं
द्यौरहंपृथिवीत्वंतावेव विवहावहै सहरेतो दधावहै प्रजांप्रजनयावहै पुत्रान् विंदावहै बहून्तेसंतुजरदष्टयः सं
प्रियौरोचिष्णूसुमनस्यमानौपश्येमशरदःशतंजीवेमशरदःशतꣳ शृणुयामशरदःशतमितिमंत्रेण अथवधूमा
ग्नेरुत्तरतः प्राङ्मुखींपूर्वोपकल्पितंदृषदुपलंदक्षिणपादेनारोहयतिवरः ॐ आरोहेममश्मानमश्मेवत्वꣳ स्थिरा
भव अभितिष्ठ पृतन्यतोववाधस्वपृतनायतः इतिमंत्रेण आरूढायांसेवनस्यांवरोगाथांगायति ॐ सरस्वतिप्रे
दमवसुभगेवाजिनीवतियांत्वाविश्वस्यभूतस्यप्रजायामस्याग्रतः यस्यांभूतꣳ समभवद्यस्यांविश्वमिदंजगत्
तामद्यगाथांगास्यामियास्त्रीणामुत्तमंयशः ततोग्रेवधूपश्चाद्वरःप्रणीताब्रह्मसहितमग्निंप्रदक्षिणांकुरुतः तत्र
वरपठनीयोमंत्रः ॐ तुभ्यमग्नेपर्य्यवहन्सूर्यांवहतुनासहपुनःपतिभ्योजायांदाअग्नेप्रजयासहततःपश्चादग्नेःस्थि
त्वालाजाहोमंसांगुष्ठहस्तग्रहणाश्मारोहणगाथागानाग्निप्रदक्षिणापुनरपितथैवएतेननवलाजहुतयःसांगुष्ठा

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

हस्तग्रहणान्तरं गाथागानत्रयं प्रदक्षिणात्रयं संपद्यते ततो ऽवशिष्टलाजैः कन्याभ्रातृदत्तैरंजलिस्थैः शूर्पकोणेन व
धूर्जुहोति ॐ भगाय स्वाहा इदं भगाय चतुर्थेऽश्मारोहणं तूष्णीं अग्रे वरः पश्चाद्वधूः ततस्तूष्णीं परिक्रमणमनंतरं वर उप
विश्य ब्रह्मणान्वारब्धः आज्येन प्राजापत्यं जुहुयात् ॐ प्रजापतये स्वाहा इदं प्रजापतय इति मनसा अत्र प्रोक्षणीपा
त्रहुतशेषाज्यप्रक्षेपः ततः आलेपनेनोत्तरोत्तरकृतसप्तमंडलेषु सप्तपदाक्रमणं वरः कारयति वक्ष्यमाणमंत्रैः तत्र
प्रथमे एकमिषे विष्णुस्त्वा नयतु द्वितीये द्वे ऊर्जे विष्णुस्त्वा नयतु तृतीये त्रीणि रायस्पोषाय विष्णुस्त्वा नयतु चतुर्थे च
त्वारि मायोभवाय विष्णुस्त्वा नयतु पंचमे पंच पशुभ्यो विष्णुस्त्वा नयतु षष्ठे षड् ऋतुभ्यो विष्णुस्त्वा नयतु सप्तमे सखे
सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयतु ततोऽग्नेः पश्चादुपविश्य पुरुषस्य स्कंधे स्थितं कुंभादाम्रपल्लवेन
जलमानीय तेन च वरो वधूं तां मूर्द्धन्यभिषिंचति ॐ आपः शिवाः शिवतमाः शांताः शांततमास्तास्ते कृण्वंतु भेषज
मिति पुनस्तथैवानीतजलेनात्मानमभिषिंचति आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन महे रणाय चक्षसे यो
वः शिवतमो रसस्तस्य भाजयतेह नः उशतीरिव मातरः तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च
नः इति तिसृभिः अथैनां सूर्यमुदीक्षयति ॐ तच्चक्षुरित्यनेन मंत्रेण वधूः सूर्यं पश्यति अस्तमिते सूर्ये ध्रुवमुदीक्षते

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

निपतिः ऋषानंतरं ध्रुवं पश्यति तत्र पठनीयो मंत्रः ॐ ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवेधि पोष्ये मयि मह्यं त्वादाद्बृहस्प
तिर्मया पत्या प्रजावती संजीव शरदः शतमिति यद्यसौ न पश्यति तथापि पश्यामीति ब्रूयात् ततो वरो वधूं द
क्षिणांसोपरि हस्तं नीत्वा तस्या हृदयमालभते मम व्रते ते हृदयं दधामि मम चित्तमनु चित्तं ते अस्तु मम वाचमेकम
ना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यमिति मंत्रेण अथैनामभिमंत्रयति वरः ॐ सुमंगलीरियं वधूरिमां समेत
पश्यत सौभाग्यमस्यै दत्वाय थास्तं विपरेतन इति मंत्रेण अथ वधूं बलवान् कश्चित् ब्राह्मण उत्थाय प्रागुदग्
द्वानडुहमागारे लोहिता ऽनडुह चर्म्मणि प्रतिलोमास्तीर्णे उपवेशयेत् वरो वा ॐ इह गावो निषीदंत्विहाश्वा इह पु
रुषा इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदंत्विति मंत्रेण अथ स्विष्टकृद्धोमः अग्नये स्विष्टकृते स्वाहा॥
इदमग्नये स्विष्टकृते स्रुवावशिष्टाज्यस्य प्रोक्षणीपात्रे प्रक्षेपः अयंच होमो ब्रह्मणान्वारब्ध कर्तृकः ततः आचम्य।
संस्रवप्राशनं अथाचम्य ॐ अद्य कृतैतत् विवाहहोमकर्म्म प्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापति दैवतममुकगो
त्रायामुकशर्म्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति ब्रह्मणे दक्षिणां दद्यात् स्वस्तीति प्रतिवचनं ॐ अद्य
कृतैतद्विवाहहोमकर्मणि आचार्य्यकर्म्म प्रतिष्ठार्थम् इदं हिरण्यममग्निदैवतं द्रव्यम् यथानामगोत्राया ऽमुक।

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

शर्म्मणो ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे ततो ब्रह्मग्रंथिविमोकः ओं सुमित्रिया न आप ओषधयः संतु इति पवित्रं गृ
हीत्वा प्रणीताजलेन शिरः संमृज्य ओं दुर्मित्रियास्तस्मै संतु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः इत्यैशान्यदिशि प्रणीतां न्युब्जी भ
कुर्यात् तत आस्तरणक्रमेण वर्हिरुत्थाप्याज्येनाभिघार्य हस्तेनैव वर्हिर्होमः तत्र मंत्रः देवा गातुविदो गातुं वित्वा
गातुमित मनसस्पत इमं देवयज्ञꣳ स्वाहा वाते धाः स्वाहा ततः उत्थाय वधूदक्षिणहस्तेन स्रुवस्पृष्ट्वा घृतपुष्पफलैः पूर्णा
हुतिः तत्र मंत्रः ओं मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निं कविꣳ सम्राजमतिथिं जनानामासन्ना
पात्रं जनयंतु देवाः स्वाहा ततः स्रुवेण भस्मानीय दक्षिणानामिकाग्रगृहीतभस्मना ओं त्र्यायुषं जमदग्नेरिति ललाटे ओं
कश्यपस्य त्र्यायुषं इति ग्रीवायां ओं यद्देवेषु त्र्यायुषं इति दक्षिणांसे ओं तन्नो अस्तु त्र्यायुषमिति हृदि एवं वध्वा अपि
कुर्यात् ततो दृष्टस्य स्थाने नते इति विशेषः ततः आचारात् शाखाशंखशमीसुवर्णप्रेरित सिंदूरकरणं वरकर्तृकं तत
तोऽन्यैरपि प्रतिष्ठितस्त्रीपुरुषैः सिंदूरकरणं ग्राम्यवचनं वरः कुर्यात् ग्राम्याः स्त्रियः अथ वेदितो मंडपमागत्य दू
र्वाक्षतादि ग्रहणं ततस्त्रिरात्रमक्षारलवणाशिनौ अधःशायिनौ निवृत्तमैथुनौ भवतः प्राङ्मुखौ वधूवरौ स्थितौ
भवतः इति विवाहकर्म्मपद्धतिः समाप्ता ॥ ❀ ॥ अथ चतुर्थीकर्म ॥ ❀ ॥ ततश्चतुर्थ्यामपररात्रे चतुर्थीकर्म तत्र

गृहाभ्यंतर एव कार्य्यं ततः उद्वर्त्तनादिकं कृत्वा युगकाष्ठमुपविश्य स्नात्वा शुद्धवस्त्रं परिधाय गृहं प्रविश्य वधूवरौ प्राङ्मु
खौ भवतः ॐ गणपत्यादिदेवतापूजनं ततः कुशकंडिकारंभः तत्र क्रमः जामातृहस्तपरिमितां वेदीं कुशैः परिसमूह्य।
तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्फ्येन स्रुवेण वा प्रागग्रं प्रादेशमात्रं त्रिरुत्तरक्रमेणोल्लिख्य उ
ल्लेखनक्रमेणानामिकांगुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य तत्र तूष्णीं कांस्यपात्रेणाग्निमानीय स्वाभिमुखं निद
ध्यात् ततः पुष्पचंदनतांबूलवस्त्राण्यादाय ॐ अस्यां रात्रौ कर्त्तव्य चतुर्थीहोमकर्मणि कृताकृतावेक्षणरूपब्रह्म
कर्मकर्तुं होतृकर्मकर्तुं ममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचंदनादिभिर्ब्रह्मत्वेन होतृत्वेन च त्वामहं वृणे
इति ब्राह्मणं वृणुयात् ॐ वृतोस्मीति प्रतिवचनं यथाविहितं कर्म कुर्विति वरेणोक्ते ॐ करवाणीति ब्राह्मणो वदेत् ता
तोग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान् कुशानास्तीर्य ब्रह्माणमग्निं प्रदक्षिणक्रमेणानीय ॐ अत्र त्वं मे
ब्रह्मा भवेत्यभिधाय ॐ भवानीति ब्राह्मणेनोक्ते कल्पितासने उदङ्मुखं ब्रह्माणमुपवेशयेत् ततः प्रथूदकपात्र।
मग्नेरुत्तरतः प्रतिष्ठाप्य प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्त
रतः कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्नेयादीशानांतं ब्रह्मणोग्निपर्यंतं नैर्ऋत्या

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

द॰क॰ ३७ द्वायव्यांतं अग्नितः प्रणीतापर्यंतं ततोग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रम
नंतर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रं आज्यस्थालीं संमार्जनार्थं कुशत्रयं उपयमनार्थं वेणीरूपकुशत्रयं समिध
स्तिस्रः श्रुवः आज्यं षट्पंचाशदुत्तरवरमुष्टिशतद्वयावच्छिन्नमतंडुलपूर्णपात्रं एतानि पवित्रच्छेदनकुशानां पूर्वपू
र्वदिशि क्रमेणासादनीयानि ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा प्रादेशमितपवित्रकरणं ततः सपवित्रकरेण प्रणी
तोदकं त्रिः प्रोक्षणीपात्रे निधाय अनामिकांगुष्ठाभ्यामुत्तराग्रे पवित्रे धृत्वा त्रिरुत्पवनं ततः प्रोक्षणीपात्रस्य सव्यहस्तक
रणं पवित्रे गृहीत्वा त्रिरुद्दिंगनं प्रणीतोदकेन प्रोक्षणी प्रोक्षणं ततः प्रोक्षणीजलेन यथासादितवस्तुसेचनं ततोग्निप्र
णीतयोर्मध्ये प्रोक्षणीपात्रं निधाय आज्यस्थाल्यामाज्यनिर्वापः ततोधिश्रयणं ततो ज्वलत्तृणादिना हविर्वेष्टयित्वा प्रद
क्षिण क्रमेण पर्यग्निकरणं ततः श्रुवं प्रतप्य संमार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यतः श्रुवसंमार्जनं प्रणीतोदके।
नाभ्युक्ष्य पुनः प्रतप्य श्रुवं दक्षिणतो निदध्यात् ततः आज्यस्याग्नेरवतारणं तत आज्ये प्रोक्षणीवदुत्पवनं अवेक्ष्य स। राम ३७
त्यपद्रव्येन निरसनं पुनः पूर्ववत् प्रोक्षण्युत्पवनं उपयमनकुशान् वामहस्तेनादाय उत्तिष्ठन् प्रजापतिं मनसा ध्यात्वात्
ष्णीमग्नौ घृताक्ताः समिधस्तिस्रः क्षिपेत् तत उपविश्य प्रोक्षणीजलेनाग्निं प्रदक्षिणं पर्युक्ष्य पवित्रं प्रणीतापात्रे धृत्वा

५ चरुस्थाल्यां तंडुलनिर्वापः ५

ब्रह्मणान्वारब्धःपातितदक्षिणजानुर्जुहुयात् तत्राघारादारभ्याहुतिचतुष्टयेततदाहुत्यनन्तरंस्रुवावस्थिताज्यंप्रोक्षण्यांसि
ञ्चेत् ॐप्रजापतयेस्वाहाइदंप्रजापतये इतिमनसाॐइंद्रायस्वाहाइदमिंद्रायइत्याघारौॐअग्नयेस्वाहाइदमग्नयेॐसो
मायस्वाहा इदंसोमाय इत्याज्यभागौ ततआज्याहुतिपंचतयेस्थालीपाकाहुतौचप्रत्याहुत्यनंतरंस्रुवावस्थितहुतशेषघृ
तस्यप्रोक्षणीपात्रेप्रक्षेपःततोब्रह्मणान्वारब्धंविनाॐअग्नेप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मणस्त्वानाथकाम
उपधावामियास्यैपतिघ्नीतनूस्तामस्यैनाशय स्वाहा इदमग्नयेॐवायोप्रायश्चित्तेत्वंदेवानांप्रायश्चित्तिरसिब्राह्मणस्त्वा
नाथकामउपधावामियास्यैप्रजाघ्नीतनूस्तामस्यैनाशयस्वाहा इदंवायवेॐसूर्यप्रायश्चित्तेत्वंदेवानांप्राश्चित्तिरसिब्राह्म
णस्त्वानाथकामउपधावामियास्यैपशुघ्नीतनूस्तामस्यैनाशयस्वाहा॥इदंसूर्यायॐचंद्रप्रायश्चित्तेत्वंदेवानांप्रायश्चि
त्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैगृहघ्नीतनूस्तामस्यनाशयस्वाहा इदंचंद्रायॐगंधर्वप्रायश्चित्तेत्वंदेवानां
प्रायश्चित्तिरसिब्राह्मणस्त्वानाथकामउपधावामियास्यैयशोघ्नीतनूस्तामस्यैनाशयस्वाहा इदंगंधर्वायततःस्थालीपाकेन
जुहुयात् ॐप्रजापतयेस्वाहाइदंप्रजापतयेइतिमनसा अग्न्याहुतिनवकेहुतशेषघृतस्यप्रोक्षणीपात्रेप्रक्षेपः अयंचहोमो

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

ब्रह्मणान्वारब्धकर्त्तृकः तत्र आज्यस्थालीपाकाभ्यां स्विष्टकृद्धोमः ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते ततः आज्येन ॐ
भूः स्वाहा इदं भूः ॐ भुवः स्वाहा इदं भुवः ॐ स्वः स्वाहा इदं स्वः एता महाव्याहृतय ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवया
सिसीष्ठाः यजिष्ठो वन्हितमः शोशुचानो विश्वा द्वेषा ँ सि प्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यां ॐ सत्वन्नो अग्ने वमो भ
वोती नेदिष्ठो अस्या उषसो व्युष्टौ अवयक्ष्व णो वरुण ँ रराणो वीहि मृडीक ँ सुहवो न एधि स्वाहा इदमग्नीवरुणाभ्यां।
ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्वमया असि अयानो यज्ञं वहास्ययानो धेहि भेषज ँ स्वाहा इदमग्नये ॐ येते
शतं वरुणं ये सहस्रं यज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुंचन्तु मरुतः स्वर्क्काः स्वाहा इदं वरुणा
य सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्क्केभ्यः ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यम ँ श्रथाय अथा वयमादित्य व्रते तवा
नागसो अदितये स्याम स्वाहा इदं वरुणाय एताः प्रायश्चित्तसंज्ञकाः ॐ प्रजापतये स्वाहा इदं प्रजापतये इति मनसा इदं प्राजा
पत्यम् ततः संस्रवप्राशनं ततः आचम्य ॐ अस्यां रात्रौ कृतेन चतुर्थीहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं
पूर्णपात्रं प्रजापतिदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् स्वस्तीति। प्रतिव
चनं ततो ब्रह्मग्रंथिविमोकः ततः सुमित्रियान आप ओषधयः संतु इति पवित्राभ्यां शिरः संमृज्य ॐ दुर्मित्रियास्तस्मै संतु यो। राम ३५
स्मान्द्वेष्टि यं च वयं द्विष्म इत्यैशान्यां दिशि प्रणीतान्युब्जीकुर्यात् ततस्तेन क्रमेण बर्हिरुत्थाप्य घृताक्तं हस्तेनैव जुहुयात् ॐ

देवागातुविदोगातुंवित्वागातुमितमनसस्पतइमंदेवयज्ञꣳस्वाहावातेधाःस्वाहा आम्रपल्लवेनजलमानीयमूर्ध्निवरोवधू
मभिषिंचति ॐ यान्तेपतिघ्नीप्रजाघ्नीपशुघ्नीगृहघ्नीयशोघ्नीनिंदितातनूर्जारघ्नीततएनांकरोमिसाजीर्यत्वंमयासहश्रीअ
मुकदेवि इति मंत्रेण ततोवधूस्थालीपाकंप्राशयतिवरः ॐ प्राणैस्तेप्राणान्संदधामि ॐ अस्थिभिस्तेऽस्थीनिसंदधामि ॐ
मांसैस्तेमांसानिसंदधामि ॐ त्वचातेत्वचंसंदधामि इति मंत्रचतुष्टयेनप्रतिमंत्रंतेऽन्नंप्राशयेत् ततोवधूहृदयंस्पृष्ट्वावरः
पठेत् ॐ यत्तेसुशीमेहृदयंदिविचंद्रमसिश्रितं वेदाहंतन्मांतद्विद्यात्पश्येमशरदःशतंजीवेमशरदःशतꣳशृणुयामश
रदःशतमिति अथकंकणमोक्षणादीनिपुत्तग्रंथविमोकादीनिआचारप्राप्तानि ततउत्थायवधूदक्षिणहस्तस्पृष्टस्रुवे
णघृतफलपुष्पपूर्णेनपूर्णाहुतिंकुर्यात् ॐ मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निंकविꣳसम्राजमति
थिंजनानामासन्नापात्रंजनयंतदेवाःस्वाहा इति मंत्रेणपूर्णाहुतिः ततस्रुवेणभस्मानीयदक्षिणानामिकाग्रगृहीतभस्म
ना ॐ त्र्यायुषंजमदग्ने इति ललाटे ॐ कश्यपस्यत्र्यायुषमिति ग्रीवायां ॐ यद्देवेषुत्र्यायुषं इति दक्षिणबाहुमूले तन्नो
अस्तुत्र्यायुषं इति हृदये एवंवध्वाअपित्र्यायुषंकुर्यात् तन्नो इत्यस्यस्थानेतन्ते इति विशेषः ततआचार्याय[द]क्षिणां
दद्यात् होत्रेचदक्षिणांदद्यात् भूयसींदद्यात् इति चतुर्थीकर्मसमाप्तम् ॥ शुभंभूयात् संवत् १९।२९ मी० फा० कृ० ८ बृहस्पति

Digitized by Sarayu Foundation Trust, Delhi and eGangotri

॥इतिदशकर्म्मपद्धतिसमाप्तम्॥ ॐ ॥

CC-0. In Public Domain. UP State Museum, Hazratganj. Lucknow